



**Tracking:**

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 10-04-2016 | Typing Started on | H K Srinivasa Rao |
| 2 | 11-04-2016 | Typing Ended on | H K Srinivasa Rao |
| 3 | 13-04-2016 | Ist Proof Reading & Correction | Sri Ranganath Gangoor & Srinivasa Rao H K |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Works of Sri Vadiraja. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 8095551774, 9901971176, , Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ 'ಸರ್ವಮೂಲ ಯಜ್ಞ'

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ- ಆಚಾರ್ಯದೇವೋಭವ''

**ಗ್ರಂಥ ಋಣ- :ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯ ಕೃತ ಪ್ರಮಾಣ ಚನ್ದ್ರಿಕಾ – ಜಯತೀರ್ಥ ವಿದ್ಯಾಪೀಠ, ಉತ್ತರಾದಿಮಠ ಬೆಂಗಳೂರು.**

TABLEOFCONTENTS


॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ....... 1

ಕೃತಜ್ಞತೆಗಳು ....... 2

प्रमाणचन्द्रिका ....... 8

हरिः ओं: ....... 8

**प्रत्यक्ष परिच्छेदः** ....... 8

मंगलाचरणम् ....... 8

प्रकरणारंभत्वप्रतिपादनम् ....... 8

गतार्थताशंका-निरासः ....... 8

उद्देशः ....... 8

लक्षणम् ....... 9

लक्षणज्ञानप्रयोजनम् ....... 9

अलक्षणम् ....... 10

परीक्षा ....... 10

लक्षणविभागः ....... 10

प्रमाणं ....... 10

संशयः ....... 11

संशयकारणानि ....... 11

विपर्ययः ....... 12

विपर्ययजनकाः ....... 12

स्मृतिरपि प्रमाणम् ....... 12

अन्योक्तप्रमाणलक्षणनिराकरणम् ....... 12

प्रमाणविभागः ....... 13

केवलप्रमाणम् ....... 13

केवलप्रमाणविभागः ....... 13

ईश्वरज्ञानम् ....... 13

लक्ष्मीज्ञानम् ....... 14

योगिज्ञानम् ....... 14

ऋजुयोगिज्ञानम् ....... 14

तात्त्विकयोगिज्ञानम् ....... 14

अतात्त्विकयोगिज्ञानम् ....... 15

अयोगिज्ञानम् ....... 15

परोक्तकेवलप्रमाणविभागव्युदासः ....... 16

अनुप्रमाणम् ....... 16

साधनम् ....... 16

कारणम् ....... 16

अनुप्रमाणम् ....... 16

सन्निकर्षः प्रत्यक्षम् ....... 17

प्रत्यक्षविभागः ....... 17

वायुः स्पर्शानुमेयः ....... 17

इंद्रिय-अर्थदोषाः ....... 18

ज्ञानोत्पत्तिक्रमः ....... 18

सन्निकर्षाद्वैध्यनिराकरणम् ....... 18

स्मृतेः मनोजन्यत्वसमर्थनम् ....... 19

प्रत्यक्षस्य चातुर्विध्यम् ....... 19

॥ अथ अनुमान परिच्छेदः ॥ ....... 20

अनुमानम् ... 20
व्याप्तिः ... 20
धर्मोश्चतुर्विधाः ... 21
अनुमितिजननप्रकारः ... 21
व्याप्तिज्ञानजनकप्रमाणविचारः ... 22
अनुमानविभागः ... 22
पक्षः ... 22
सपक्षः ... 23
विपक्षः ... 23
द्विविधा व्याप्तिः ... 23
केवलान्वयिव्याप्तिः ... 23
केवलव्यतिरेकि ... 24
अन्वयव्यतिरेकि ... 24
अनूदितव्याप्तिविभागव्युदासः ... 25
पुनरनुमानविभागः ... 25
अनुमानावयवाः ... 25
उपपत्तिदोषाः ... 26
**अथ आगमपरिच्छेदः** ... 30
आगमः ... 30
शब्ददोषाः ... 30
पद-वाक्यम् ... 31
आकांक्षा ... 31
योग्यता ... 32

सन्निधिः ....................................................................................................32
शक्तिविचारः ..............................................................................................32
वृत्तिः ........................................................................................................33
द्विविधः आगमः ..........................................................................................34
वेदापौरुषेयत्वप्रामाण्यस्थापनम् ......................................................................34
आगमस्य पृथक्प्रामाण्यव्यवस्थापनम् ..............................................................34
अर्थापत्त्यादीनामुक्तेष्वंतर्भावसमर्थनम् ..............................................................35
प्रामाण्यस्वतस्त्वम् ..........................................................................................36
अप्रामाण्यं परतः ..........................................................................................36
प्रामाण्यविषये सिद्धांतः ..................................................................................37
**अथ प्रमेयपरिच्छेदः**.......................................................................................37
तत्त्वम् .......................................................................................................38
स्वतन्त्रम् ....................................................................................................38
अस्वतन्त्रम् .................................................................................................38
भावः .........................................................................................................39
अभावः .......................................................................................................39
चेतनः ........................................................................................................40
अचेतनम् ....................................................................................................41
अभावविवरणम् ............................................................................................41
अन्योन्याभावस्य वस्तुस्वरूपत्वम् ......................................................................42
गुणगुणिनोः भेदाभेद-अत्यंताभेदविचारः ..........................................................42
क्रियाक्रियावतोः भेदाभेदात्यन्तभेदविचारः .........................................................42
जातिव्यक्तिविचारः ........................................................................................43

अंशांश्यभेदभेदाभेदविचारः ..... 43

सर्वं स्वतन्त्राधीनम् ..... 43

अंतिममंगलम् ..... 44

# प्रमाणचन्द्रिका

## हरिः ओं:

## प्रत्यक्ष परिच्छेदः

### मंगलाचरणम्

लक्ष्मीपतेः पदाम्भोजयुगं नत्वा गुरोरपि।

प्रमाणचन्द्रिकां कुर्मो बालानां बोधसिद्धये॥

### प्रकरणारंभत्वप्रतिपादनम्

इह खलु, 'सुखमेव मे स्यात्, दुःखं मनागपि मा भूत्' इति निखिलापेक्षितमोक्षस्य भगवत्तदन्यस्वातन्त्र्यास्वातन्त्र्यज्ञानसाध्यत्वात् मुमुक्षुणा परतन्त्रमिदं स्वतन्त्रवदायत्ततया अवश्यं वेदितव्यम्। तदुक्तं भाष्यकारैः –

'य एतत्परतन्त्रं तु सर्वमेव हरेस्सदा।

वशमित्येव जानाति संसारान्मुच्यते हि सः'॥ इति॥

परापरतत्त्वज्ञानं च प्रमाणाधीनमिति, तन्निरूपणार्थमिदं प्रकरणमारभ्यते।

### गतार्थताशंका-निरासः

यद्यपि जयार्यैरेव पद्धत्यादौ प्रमाणलक्षणादिकं सविस्तरं प्रतिपादितम्, तथापि भावगम्भीरैरपि वाक्यैर्वर्णितमिति, नाल्पप्रज्ञैः सुखेन शक्यते बोद्धुमिति, तेषां तद्बोधनार्थं, प्रायेण तदुक्तमेव किञ्चित् प्रमेयं सङ्क्षेपेण प्रतिपादयितुमिदं प्रकरणमिति, न वैयर्थ्यदोषः॥

### उद्देशः

प्रमाणादिज्ञानं च उद्देशादित्रिकाधीनमिति उद्देशादीनां लक्षणमुच्यते।

नाममात्रेण वस्तुसङ्कीर्तनम् उद्देशः॥ 'उद्देश' इति लक्ष्यनिर्देशः। 'नाममात्रेण वस्तुसङ्कीर्तनमि'ति लक्षणोक्तिः। एवमुत्तरत्रापि द्रष्टव्यम्।

कीर्तनं शब्दः। तावन्मात्रस्य लक्षणत्वे गङ्गाघोषेऽति व्याप्तिः। तद्वाणाय सङ्कीर्तनमिति। तदर्थस्तु वर्णात्मकशब्दत्वम्। तावन्मात्रस्य लक्षणत्वे वन्ध्यासुत इत्यादिशब्दे गतम्। अतो वस्त्विति॥ तावन्मात्रस्य लक्षणत्वे काकरवे गतम्। अतो नाम्नेति। गीर्वाणभाषयेत्यर्थः। तत्परिहारार्थं मात्रेणेति। तस्य लक्षणतया अप्रयुक्तत्वे सतीत्यर्थः। गन्धवती पृथिवीत्यादिलक्षणवाक्यस्य तु गीर्वाणभाषया वस्तुसङ्कीर्तनत्वेऽपि लक्षणतयाऽप्रयुक्तत्वाभावान्नातिव्याप्तिः॥ तथा च लक्षणतया अप्रयुक्तत्वे सति संस्कृतनाम्ना वस्तुप्रतिपादकशब्दः उद्देश इति पर्यवस्यति।

केचित् – गन्धवती पृथिवीत्यादिलक्षणवाक्ये अतिव्याप्तिवारणाय मात्रेणेति। तस्यासाधारणधर्मानुपरागेणेत्यर्थः। तथा च- गन्धवती पृथिवीति लक्षणवाक्ये गन्धवत्त्वरूपासाधारणधर्मोपरागेणैव वस्तुसङ्कीर्तनत्वेन तदनुपरागेण वस्तुसङ्कीर्तनत्वाभावान्नातिव्याप्तिः॥ न च 'पृथिवीत्याद्युद्देशेऽसम्भवः, तस्य पृथिवीत्यादि रूपासाधारणधर्मोपरागेणैव वस्तुप्रतिपादकत्वात्' इति वाच्यम्। लक्ष्यतावच्छेदकातिरिक्तासाधारणधर्मानुपरागेण वस्तुप्रतिपादकशब्दत्वस्य विवक्षितत्वात् इत्याहुः॥ तन्न। पृथिवीत्ववती पृथिवीति लक्षणवाक्येऽतिव्याप्तेः। तस्य लक्ष्यतावच्छेदकातिरिक्तासाधारणधर्मानुपरागेण वस्तुप्रतिपादकत्वात्।

## लक्षणम्

लक्ष्यमात्रव्यापको धर्मो लक्षणम्॥ सकललक्ष्यवृत्तित्वे सति लक्ष्येतरावृत्तित्वमित्यर्थः। यथा गोः सास्नादिमत्त्वम्। तच्च गोमात्रवृत्ति, नास्ति चागोषु।

धर्मो लक्षणमित्युक्ते एकशफत्वेऽतिव्याप्तिः। अतो लक्ष्येति। लक्ष्यवृत्तिधर्म इत्यर्थः॥ तावत्युक्ते शबलत्वेऽतिव्याप्ति। तद्वारणाय लक्ष्यव्यापकेति॥ तावत्युक्ते शृङ्गित्वेऽतिव्याप्तिः। तत्परिहाराय लक्ष्यमात्रेति।

## लक्षणज्ञानप्रयोजनम्

सजातीयविजातीयव्यावृत्तिर्व्यवहारश्च लक्षणज्ञानप्रयोजनम्। लक्ष्यतावच्छेदकसाक्षाद्व्यापकजात्यवच्छिन्नमिह सजातीयम्। तदनवच्छिन्नं च विजातीयमिह विवक्षितम्। गोलक्ष्ये गोत्वं लक्ष्यतावच्छेदकम्। तस्य साक्षाद्व्यापकं पशुत्वम्। तदवच्छिन्ना अश्वादयः

सजातीयाः। तदनवच्छिन्ना घटादयो विजातीयाः। साक्षाद्व्यापकत्वं नाम तदव्यापकव्यापकत्वे सति तद्व्यापकत्वम्। पशुत्वस्य लक्ष्यताच्छेदकगोत्वव्यापकपृथिवीत्वाव्यापकत्वे सति गोत्वव्यापकतत्वात्साक्षाद्व्यापकत्वं बोध्यम्। तेन प्रमेयत्वादिना सर्वस्यापि सजातीयत्वेन विजातीयस्याभावात् कथमेतदिति चोद्यानवकाशः॥ एव सर्वेष्वपि लक्षणेषु सजातीयादि ज्ञेयम्।

## अलक्षणम्

सकललक्ष्यवृत्तित्वे सति लक्ष्येतरावृत्तित्वाभावरूपो धर्मस्तु अलक्षणम्।

इदं च विशिष्टाभावरूपम्। विशिष्टाभावश्च त्रिविधः– विशेष्याभावेन, विशेषणाभावेन, उभयभावेन चेति। तत्र श्रृङ्गित्वरूपेऽलक्षणे विशेष्याभावेन विशिष्टाभावो द्रष्टव्यः। शबलत्वरूपालक्षणे विशेषणाभावेन विशिष्टाभावो ज्ञातव्यः। एकशफत्वरूपालक्षणे उभयाभावाद्विशिष्टाभावो ज्ञेयः॥

## परीक्षा

युक्तायुक्तचिन्ता परीक्षा।

## लक्षणविभागः

अलक्ष्ये लक्षणगमनमतिव्याप्तिः। लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः॥ लक्ष्ये क्वाप्यवर्तनमसम्भवः॥ यस्य लक्षणमुच्यते तल्लक्ष्यम्।

## प्रमाणं

तत्रादौ प्रमाणसामान्यलक्षणमुच्यते – यथार्थं प्रमाणम्। यथावस्थितज्ञेयविषयीकारित्वं प्रमाणमित्यर्थः॥

यद्यप्यत्र बहुवक्तव्यमस्ति तथाप्यत्र बालानामधिकाराद्बुद्धिमतां पद्धत्यैव ज्ञातुं शक्यत्वाच्च नेहोच्यते॥ एवममुत्तरत्रापि ज्ञातव्यम्।

ज्ञेयविषयीकारित्वमात्रस्य संशयविपर्ययसाधारण्यात् यथावस्थितेति विशेषणोपादानम्। यथावस्थितं प्रमाणमित्युक्ते प्रमातृप्रमेययोरतिव्याप्तिः। अतो ज्ञेयविषयीकारीत्युक्तम्॥ अत्र साक्षाद्वा परम्परया वा ज्ञेयविषयीकारित्वं विवक्षितमिति न प्रत्यक्षादावव्याप्तिः। न चैवमननुगमः; तस्यादोषत्वात्॥

प्रमावान् प्रमाता । प्रमाविषयः प्रमेयम्॥ यथार्थज्ञानं प्रमा। ज्ञानमित्यनुक्तौ करणेऽतिव्याप्तिः। यथार्थेत्यनुक्तौ संशयादौ॥

## संशयः

ननु किमिदं संशयत्वम्।‘अनवधारणत्वं तदिति चेन्न; अवधारणत्वं निश्चयत्वं, तच्च संशयभिन्नज्ञानत्वम्, संशयत्वं च निश्चयभिन्नज्ञानत्वम् इत्यन्योन्याश्रयत्वात्’ इति चेन्न। अनवधारणज्ञानत्वस्यैव संशयलक्षणत्वात्। न चान्योन्याश्रयः। एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारावगाहिज्ञानस्यैव अनवधारणज्ञानपदेन विवक्षितत्वात्।

“’ज्ञानं संशय’” इत्युक्ते अयं घट इति ज्ञानेऽतिव्याप्तिः। अतोऽनेकाकारावगाहीत्युक्तम्। तावत्युक्ते स्थाणुपुरुषौ, घटपटस्तम्भकुम्भा इत्यादिसमूहालम्बने अतिव्याप्तिः। तत्परिहारार्थमेकस्मिन्धर्मिणीति॥ तावत्युक्ते वृक्षः शिंशुपा, घटो द्रव्यमित्यादिज्ञाने अतिव्याप्तिः॥ अतो विरुद्धेति॥ तावत्युक्ते इदं रजतमिति भ्रमेऽतिव्याप्तिः, अतो भासमानेति। अत्र विरोधे भासमानत्वस्य विवक्षितत्वान्नोक्तदोष इत्यवधेयम्।

## संशयकारणानि

‘तस्य संशयस्य निर्णयकाभावसहकृताः साधारणधर्मासाधारणधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धयः पञ्च कारणानी’ति केचिदाहुः॥ तन्न । साधारणधर्मजन्यः संशयो यथा– स्थाणुपुरुषयोः साधारणमूर्ध्वतालक्षणं धर्मं पुरोवर्तिन्युपलभ्य स्थाणुपुरुषौ स्मृत्वा विशेषजिज्ञासायां स्थाणुत्वनिश्चायकं वक्रकोटरादिकं, पुरुषत्वनिश्चायकं शिरःपाण्यादिकमनुपलभमानस्य डोलायमानं संशयज्ञानमुत्पद्यते ‘किमयं स्थाणुः पुरुषो वे’ति। असाधारणधर्मजन्यः संशयो यथा – शब्दे चाकाशविशेषगुणत्वमसाधारणधर्ममुपलभमानस्य निर्णायकमजानतः संशयो भवति - ‘किमयं शब्दो नित्योऽनित्यो वे’ति। विप्रतिपत्तिजन्यः संशयो यथा – इन्द्रियेषु वैशेषिकसाङ्ख्ययोः भौतिकत्वाभौतिकत्वविप्रतिपत्तिं पश्यतो निश्चायकमपश्यतः संशयो भवति ‘- किमिन्द्रियाणि भौतिकानि उताभौतिकानी’ति। उपलब्धिजन्यः संशयो यथा – कूपखनननानन्तरं जलोपलब्धौ सत्यां निश्चायकाभावे संशयो भवति ‘किं प्राक् सदेवोदकं कूपखनननेनाभिव्यक्तं सदुपलभ्यते उतासत्तदेवोत्पन्नमि’ति। अनुपलब्धिजन्यः संशयो यथा – अस्मिन्वटे पिशाचोऽस्तीति वार्तां श्रुतवतो हि वटसमीपं गतस्य पिशाचानुपलब्धौ सत्यां निर्णायकाभावे संशयो भवति- ‘किं विद्यमान एव पिशाचोऽन्तर्धानशक्त्या नोपलभ्यते किं त्वविद्यमान एवे’ति॥

'उपलब्ध्यनुपलब्ध्योः साधारणधर्म एवान्तर्भावात्त्रीण्येव कारणानी'त्यपरे। उपलब्धेः साधारण्यं कथम्? उपलब्धिर्हि अन्धकारे सतामेव घटादीनामालोकानयनेन दृष्टा, असतां घटादीनां कुलालादिव्यापारानन्तरमिति। अपलब्धेः साधारण्यं कथम्? अनुपलब्धिर्हि सतामीश्वरादीनां असतां शशविषाणादीनां च दृष्टेति॥

असाधारणदर्मविप्रतिपत्त्योरपि साधारणधर्म एवान्तर्भावात्साधारणधर्म एक एव संशयहेतुरिति तत्त्वम्। एतयोरन्तर्भावप्रकारस्तु पद्धत्युक्तप्रकारेण ज्ञेयः।

## विपर्ययः

तद्भाववत्येव तत्प्रकारकत्वावधारणरूपज्ञानं विपर्ययः।

ज्ञानं विपर्यय इत्युक्ते संशयेऽतिव्याप्तिः। तद्व्युदासार्थमवधारणरूपमिति॥ तावत्युक्ते सम्यज्ज्ञानेऽतिव्याप्तिः। अत स्तद्भाववति तत्प्रकारेति॥ तद्भाववति तत्प्रकारकज्ञानं विपर्यय इत्युक्ते पुनः संशयेऽतिव्याप्तिः॥ अतोऽवधारणेति॥ तद्भाववतितत्प्रकारकावधारणरूपज्ञानं विपर्यय इत्युक्ते वृक्षः कपिसंयोगीति प्रमायामतिव्याप्तिः। संयोगस्याव्याप्यवृत्तित्वात्। अत एवेति।

## विपर्ययजनकाः

स च प्रत्यक्षानुमानागमाभासेभ्यो जायते। तत्र प्रत्यक्षाभासतो यथा – शुक्तिकायां रजतमिति। अनुमानाभासतो यथा– धूलीपटले धूमभ्रमाद्वह्न्यभाववति वह्न्यनुमितिः॥ आगमाभासतो यथा– नदीतीरे पञ्च फलानि सन्तीति प्रतारकवाक्यजन्यं ज्ञानम्॥

## स्मृतिरपि प्रमाणम्

ननु यथावस्थितज्ञेयविषयीकारित्वं प्रमाणलक्षणमिति यदुक्तं तदनुपपन्नम्, स्मृतावतिव्याप्तेरिति चेन्न।'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्। प्रमाणमिति विज्ञेयं धर्माद्यर्थे बुभूषुभि (मुमुक्षुभि)रि'ति श्रुत्यादेः स्मृतिप्रामाण्यस्य सिद्धत्वात्॥

## अन्योक्तप्रमाणलक्षणनिराकरणम्

केचित् 'प्रमाकरणं प्रमाण'मिति वदन्ति। तत्र प्रमेत्यनुक्तौ परश्चादावतिव्याप्तिः। प्रेत्यनुक्तौ प्रमाणाभासेऽतिव्याप्तिः। करणमित्यनुक्तौ असम्भवः, फलेऽतिव्याप्तिश्चेति। तन्न। फलेऽव्याप्तेः।

'प्रमाव्याप्तं प्रमाणमि'त्यपरः॥ तदपि न सम्भवति। यदा वटादिसर्वं प्रमेयं तदा ईश्वरप्रमेति, सर्वप्रमेयस्येश्वरप्रमाव्याप्तत्वेन प्रमेयेऽतिव्याप्तेः॥ साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तत्वं विवक्षितमिति चेन्न। आश्रयपदवैयर्थ्यात्॥ नन्वीश्वरस्यापि प्रामाण्यात्तत्राव्याप्तिपरिहारार्थं तदिति चेन्न। प्रमाणशब्दस्य ल्युडन्तत्वात्॥ नन्वीश्वरस्य कर्तृत्वेऽपि प्रमां प्रत्यधिकरणत्वमस्त्येव, अतः प्रमाणशब्दवाच्यत्वमुपपद्यत इति चेन्न। तस्य कर्तृत्वेऽपि अधिकरणत्वाभावात् क्रियाश्रययोः कर्तृकर्मणोराधारत्वस्य अधिकरणलक्षणत्वादिति।

'अनुभूतिः प्रमाणम्। स्मृतिव्यतिरिक्तं ज्ञानमनुभूतिः॥ ज्ञानमित्यनुक्तौ घटेऽतिव्याप्तिः। स्मृतिव्यतिरिक्तेत्यनुक्तौ स्मृतावतिव्याप्तिरि'त्यन्यः॥ तन्न। संशयादावतिव्याप्तेः, स्मृतौ वेदादौ चाव्याप्तेश्चेति॥

## प्रमाणविभागः

प्रमाणं द्विविधम् – केवलमनुप्रमाण चेति। अत्र प्राधान्यक्रमेणोद्देशः।

## केवलप्रमाणम्

तत्र यथार्थज्ञानं केवलप्रमाम्। यथार्थमिति संशयादिव्युदास। ज्ञानमिति प्रत्यक्षव्युदासः॥

## केवलप्रमाणविभागः

केवलप्रमाणं चतुर्विधम् – ईश्वरज्ञानं लक्ष्मीज्ञानं योगिज्ञानमयोगिज्ञानं चेति।

## ईश्वरज्ञानम्

स्वतन्त्रज्ञानमीश्वरज्ञानम्। स्वतन्त्रमिति लक्ष्म्यादिज्ञाननिरासः॥ ज्ञानमिति ईश्वरव्युदासः। यद्वा स्वपरगतसर्वार्थविषयज्ञानमीश्वरज्ञानम्। ज्ञानमीश्वरज्ञानमित्युक्तेऽयोगिज्ञानेऽतिव्याप्तिः, तद्वारणाय सर्वार्थविषयमिति। तावत्युक्तेऽन्यत्र सर्वार्थविषये लक्ष्मीज्ञानादावतिव्याप्तिः, तद्वारणाय स्वपरगतेति। ईश्वरप्रत्यक्षेऽतिव्याप्तिवारणाय ज्ञानपदम्॥ तन्नियमेन यथार्थमीश्वरस्वरूपमनादिनित्यं च।

## लक्ष्मीज्ञानम्

ईश्वरैकाधीनं ज्ञानं लक्ष्मीज्ञानम्॥ लक्ष्मीज्ञानमित्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः। अत ईश्वराधीनमिति। अधीनत्वस्य भेदघटितत्वान्नातिव्याप्तिः। तावत्युक्ते ब्रह्मादिज्ञानेऽतिव्याप्तिः। अत एकेति॥ ज्ञानमिति लक्ष्मीनिवृत्तिः॥

अथ च ईश्वरे त्वसार्वत्रिकमन्यत्रानालोचने सर्वविषयज्ञानं लक्ष्मीज्ञानम्॥ ज्ञानं लक्ष्मीज्ञानमित्युक्ते अस्मदादिज्ञानेऽतिव्याप्तिः, अतः सर्वविषयमिति। तावत्युक्ते ऋजुयोगिज्ञानेऽतिव्याप्तिः, अतोऽनालोचने इति, तस्यालोचने सर्वविषयत्वात्। अनालोचने सर्वविषयज्ञानं लक्ष्मीज्ञानमित्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः, अत ईश्वरे त्वसार्वत्रिकमिति॥ ईश्वरे त्वसार्वत्रिकम् अलोचने सर्वविषयज्ञानमित्युक्ते व्याघातेनासम्भवः, स्यात्, अतोऽन्यत्रेति लक्ष्मीप्रत्यक्षेऽतिव्याप्तिवारणाय ज्ञानमिति॥ तदपि नियमेन यथार्थम्। लक्ष्मीस्वरूपमनादिनित्यं च॥

## योगिज्ञानम्

योगप्रभावावलब्धातिशयं ज्ञानं योगिज्ञानम्॥ तत्त्रिविधम् – ऋजुयोगिज्ञानं, तात्विकयोभिज्ञानमतात्त्विकयोगिज्ञानं चेति।

## ऋजुयोगिज्ञानम्

ऋजवो नाम ब्रह्मत्वयोग्या जीवाः॥ ईश्वरादन्यत्र आलोचने सर्वविषयं ज्ञानं ऋजुयोगिज्ञानम्॥ ज्ञानमृजुयोगिज्ञानमित्युक्ते अस्मदादिज्ञानेऽतिव्याप्तिः, अतः सर्वविषयमिति॥ तावत्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः, अतः सर्वविषयमिति। तावत्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः, अत आलोचने इति। तावत्युक्तेऽसम्भवः, तस्येश्वरे आलोचने सर्वविषयत्वाभावात्; अत ईश्वरादन्यत्रेति।

तत् द्विविधम् – स्वरूपं मनोवृत्तिरूपं चेति॥ तत्र स्वरूपमनादिनित्यम्। वृत्तिज्ञानं तु प्रवाहतोऽनादि॥ द्वयमपि नियमेन यथार्थम्॥

## तात्त्विकयोगिज्ञानम्

तद्व्यतिरिक्ताः तत्वाभिमानिनो देवास्तात्विकाः। तत्त्वाभिमानिनो देवस्तात्त्विका इत्युक्ते ऋजुयोगिष्वतिव्याप्तिः, अतस्तद्व्यतिरिक्ता इति। तद्व्यतिरिक्ता इत्युक्ते अतात्त्विकदेवेष्वतिव्याप्तिः, अतस्तत्त्वाभिमानिन इति॥ तद्व्यतिरिक्तास्तत्त्वाभिमानिन इत्युक्ते असुरेष्वतिव्याप्तिः, अतो देवा इति॥

अनादित्वे सति ईश्वरादन्यत्र आलोचनेऽप्यसर्वविषयं ज्ञानं तात्त्विकयोगिज्ञानम्॥ ज्ञानं तात्त्विकयोगिज्ञानमित्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः, अतोऽसर्वविषयमिति। तावत्युक्ते लक्ष्मीज्ञानेऽतिव्याप्तिः, तस्येश्वरेऽसर्वविषयत्वात् अत ईश्वरादन्यत्रेति। तावत्युक्ते ऋजुयोगिज्ञानेऽतिव्याप्तिः, अतः ईश्वरादन्यत्रेति। तावत्युक्ते ऋजुयोगिज्ञानेऽतिव्याप्तिः, तस्यालोचनाभावदशायामीश्वरादन्यत्रासर्वविषयत्वात्; अतोऽनादित्वे सतीति।

तदपि द्विविधम् –स्वरूपं बाह्यं चेति। स्वरूपं यथार्थमेव। बाह्यं कदाचिद्यथार्थमपि।

## अतात्त्विकयोगिज्ञानम्

ऋजुतात्त्विकव्यतिरिक्ता देवऋष्यादयो योगिनोऽतात्त्विकाः॥ सादित्वे सति ईश्वरादन्यत्र अल्पज्ञानयुक्तं ज्ञानमतात्त्विकायोगिज्ञानम्॥ ज्ञानमतात्त्विकयोगिज्ञानमित्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः, अतोऽल्पज्ञानयुक्तमित्युक्तम्। तावत्युक्ते अयगिज्ञानेऽतिव्याप्तिः, अतोऽल्पेति। तावत्युक्तेऽसम्भवः, तस्य ईश्वरे बहुलाज्ञानयुक्तत्वात्, अत ईश्वरादन्यत्रेति। तावत्युक्ते तात्त्विकयोगिज्ञानेऽतिव्याप्तिः, अत-सादित्वे सतीति।

तदपि द्विविधम् स्वरूपं बाह्यं चेति॥ यथार्थ्यनियमादिपूर्ववत्॥

## अयोगिज्ञानम्

योगिव्यतिरिक्ता जीवा अयोगिनः॥ ईशलक्ष्मीनिरासाय जीवा इति। योगिनिरासाय योगिव्यतिरिक्ता इति।

ईश्वरादन्यत्र अज्ञानप्रचुरज्ञानमयोगिज्ञानम्॥ अज्ञानप्रचुरज्ञानं योगिज्ञानमित्युक्ते योगिज्ञानेऽतिव्याप्तिः, तस्येश्वरे अज्ञानप्रचुरत्वात्, अत ईश्वरादन्यत्रेति।

तदपि पूर्ववत् द्विविधम्। उत्पत्तिविनाशवच्च।

स्वरूपज्ञानस्याभिव्यक्त्यपेक्षया उत्पत्तिविनाशवत्त्वम्। वृत्तिज्ञानस्य स्वरूपापेक्षया द्रष्टव्यम्॥

अयोगिनोऽपि त्रिविधः। मुक्तियोग्याः नित्यसंसारिणस्तमोयोग्याश्चेति॥ मुक्तियोग्यानां स्वरूपज्ञानं यथार्थमेव। नित्यसंसारिणां तु मिश्रमेव। अन्येषां वयथार्थमेव॥ बाह्यं तु त्रयाणामप्युभवयविधमिति॥

## परोक्तकेवलप्रमाणविभागव्युदासः

‘इन्द्रियजं लिङ्गजचं स्मृतिः आर्षं चेति चतुर्विधं यथार्थज्ञामि’ति वैशेषइकाः। तदसत् । नित्यस्येश्वरज्ञानादेः आगमजन्यस्य च सङ्ग्रहात्। स्मृतेर्मनोरूपेन्द्रियजन्यत्वेन आर्षस्य च योगिज्ञानत्वेन योगिज्ञानस्य योगसहकृतेन्द्रियजन्यज्ञानप्रभेदत्वस्य तैरेवोक्तत्वेन पृथग्ग्रहणयोगाच्च॥

## अनुप्रमाणम्

यथार्थज्ञानसाधनमनुप्रमाणम्॥ यथार्थमित्युक्ते केवलेऽतिव्याप्तिः। ज्ञानमित्युक्ते तत्र संशयादौ चातिव्याप्तिः। साधनमित्युक्ते कुठारेऽतिव्याप्तिः। यथार्थज्ञानमित्युक्ते केवलेऽतिव्याप्तिः। यथार्थसाधनमित्युक्ते प्रत्यक्षसाधनेऽतिव्याप्तिः। ज्ञानसाधनमित्युक्ते संशयादिसाधनेऽतिव्याप्तिः। यथार्थज्ञानकरणमित्युक्ते प्रमात्रादावतिव्याप्तिः। इति सर्वं सार्थकम्।

## साधनम्

सति च प्रमात्रादौ कारणे यदभावात् कार्याभावो यस्मिन् सत्यप्रतिबन्धे भवत्येव कार्यं, तदुच्यते साधनमिति। यथा व्यापारवान् कुठारः। अतो न यादृच्छिकसंवादिलिङ्गविभ्रमादावतिव्याप्तिः॥ काचादयः प्रतिबन्धा इत्युच्यन्ते।

## कारणम्

अन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्ति कारणम्। कार्यं प्रागभावप्रतियोगि। तत्कारणं द्विविधम् – उपादानकारणं निमित्तकारण चेति॥ परिणामित्वे सति यत्कारणं तदुपादनकारणम्। यथा जगतः प्रकृतिः, मृत्पिण्डश्च घटस्य॥ अपरिणामित्वे सति यत्कारणं तन्निमित्तकारणम्। यथाऽदृष्टादिकं जगतः, दण्डादिकं च घटस्य। ततश्च उक्तकारणकालापेयदतिशयितं तत्साधनमित्युक्तं भवति।

## अनुप्रमाणम्

अनुप्रमाण त्रिविधम् – प्रत्यक्षमनुमानमागमश्चेति। प्रायेणासन्नाव्यवहितवर्तमानकतिपयार्थग्राहकं प्रत्यक्षम्। अनासन्नातीतानागतव्यवहितार्थगोचरमनुमानम्। स्वातन्त्र्याशेषार्थविषय आगम इति॥ अर्थग्रहणक्रमेणोद्देशः।

अप्रमाणत्रैविध्यात्तज्जन्यज्ञानमपि त्रिविधम्। प्रत्यक्षानुमिति शाब्दभेदात्, तत्र प्रत्यक्षजन्यं ज्ञानं प्रत्यक्षं. इदमेव साक्षात्कार इत्युच्यते॥ ॥ अनुमानजन्यं ज्ञानमनुमितिः॥ आगमजन्यं ज्ञानं शाब्दम्॥ निर्दोषेन्द्रियं प्रत्यक्षम्। दुष्टेन्द्रियेऽतिव्याप्तिवारणाय निर्दोषेति॥ अनुमानादावतिव्याप्तिवारणाय इन्द्रियमिति।

## सन्निकर्षः प्रत्यक्षम्

ननु प्रत्यक्षं करणविशेषः। करणस्य चावान्तरव्यापारेण भाव्यम्। यथा छिदाकरणस्य परशोर्दारुसंयोगोऽवान्तरव्यापारः। तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः। यथा परशुजन्यो दारुसंयोगः॥ सत्यम्। इन्द्रियं कारणम्। तस्यार्थसंयोगोऽवान्तरव्यापरः। साक्षात्कारः फलम्॥ अत्र धर्मिप्रधान्यविवक्षया 'अदुष्टमिन्द्रियं त्वक्षमि'ति तत्त्वनिर्णयानुरोधेन स्वस्वविषयसन्निकृष्टमदुष्टमिन्द्रियं प्रत्यक्षमित्युक्तम्। क्वचिदवान्तरव्यापारप्राधान्यविवक्षया लक्षणानुरोधेन 'निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षमि'त्युक्तम्। अतो न विरोधः।

## प्रत्यक्षविभागः

प्रत्यक्षं सप्तविधम् – साक्षिषिन्द्रियभेदात्॥ अत्र चेतनस्वरूपेन्द्रियं साक्षीत्युच्यते। तस्य विषयाः – आत्मस्वरूपं, तद्धर्माः सुखादयो, भावरूपाविद्या मनः, तद्वृत्तयो ज्ञानसुखाद्याः कालोऽव्याकृताकाशश्चेत्याद्याः। स च स्वरूपज्ञानं व्यनक्ति॥ षडिन्द्रियाणि च घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि॥ तत्र गन्धस्तद्विशेषाः सौरभादयो घ्राणेन्द्रियस्य विषयाः॥ रसस्तद्विशेषा माधुर्यादयो रसनेन्द्रियस्य विषयाः। महत्त्वसमानाधिकरणोद्भूतरूपवन्ति द्रव्याणि, केचिद्गुणः सङ्ख्यादय, कर्माणि, जातयश्चक्षुस्त्वचोर्विषयाः॥ वायुस्पर्शोऽपि त्वचो विषयः। वायुस्तु स्पर्शानुमेयः।

## वायुः स्पर्शानुमेयः

तथा हि – योऽयं वायौ वाति सति अनुष्णशीतस्पर्शः उपलभ्यते स स्पर्शः क्वचिदाश्रितः गुणत्वात् रूपवत्। न चास्य पृथिवी आश्रयः उद्भूतस्पर्शवत्याः पृथिव्या उद्भूतरूपवत्त्वनियमात्। उपलभ्यमानस्पर्शाश्रयस्य नीरूपत्वात्। नापि जलतेजसी, उपलभ्यमानस्पर्शाश्रयस्यानुष्णशीतत्वात्। न विभुचतुष्टयं, स्पर्शरहितत्वात् । तत्रापि तदङ्गीकारे

सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्। न मनः परमाणुस्पर्शस्यातीन्द्रियत्वात्। तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः॥ ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति चेन्न । उद्भूतरूपवत्त्वस्योपाधित्वात्; अस्योपाधेः फक्षधर्मवावच्छिन्नसाध्यव्यापकत्वात्।'यत्र बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति व्याप्तिर्नास्ति, पक्षे साधनव्यापकत्वात्। तस्माद्वायोः स्पर्शानुमेयत्वं सिद्धम्।

शब्दस्तद्विशेषा वर्णादयः श्रोत्रेन्द्रियस्य विषयाः॥

## इंद्रिय-अर्थदोषाः

एतेषां पञ्चेन्द्रियाणां मनोऽनधिष्ठितत्वं काचकामलायाश्च दोषाः।

मनसस्तु बाह्येन्द्रियाधिष्ठानेनैते सर्वे विषयाः। बहिरिन्द्रियनैरपेक्ष्येणातीताः पदार्थाः मनोविषयाः। स्मृतिः फलम्;' मानसप्रत्यक्षजा स्मृतिः' इत्युक्तेः। तत्र संस्कारः सन्निकर्षरूपः, यथायोगीन्द्रियाणां योगजो धर्मः॥ तस्य मनसोदोषा रागादयः।

अर्थदोषाश्च – अतिदूरस्थत्वम्, अतिसामीप्यं, सौक्ष्म्यं व्यवधानम्, अनभिव्यक्तत्वं, सादृश्यम् चेत्यादयः॥

एतेषु दोषेषु सत्सु क्वचिज्ज्ञानमेव न जायते, क्वचिच्च संशयादिकमुत्पद्यते।

## ज्ञानोत्पत्तिक्रमः

इन्द्रियजन्यज्ञाने आत्मादिचतुर्णां सन्निकर्षः कारणम्। आत्मा मनसा संयुज्यते। मन इन्द्रियेण इन्त्रियमर्थेन। इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमात्।

सर्वेषामिन्द्रियाणां स्वस्वविषयैः स्वस्वविषयप्रतियोगिकाभावेन च साक्षादेक एव सन्निकर्षः कारणम्। न तु क्वचित्परम्परा इति ज्ञातव्यम्॥

## सन्निकर्षाड्विध्यनिराकरणम्

एके तु '-साक्षात्कारप्रमाहेतुरिन्द्रियार्थयोः सन्निकर्षः षड्विध। तद्यथा – १.संयोगः, २.संयुक्तसमवायः, ३.संयुक्तसमवेतसमवायः, ४.समवायः, ५.समवेतसमवायः, ६.विशेषणविशेष्यभावश्चेति॥

तत्र चक्षुषः घटादिद्रव्यैः संयोगः रूपकर्मसामान्यैः संयुक्त समवायः। तथा त्वचो घटादिद्रव्यैः संयोगः। स्पर्शकर्म सामान्यैः संयुक्तसमवायः। तथा मनस आत्मना संयोगः, आत्मगतसुखादिभिश्च

संयुक्तसमवायः। घ्राणरसनायोर्गन्धरसाभ्यां संयुक्तसमवायः। ताभ्यां संयुक्ते फले गन्धरसयोः समवायात्;गुणकर्मगतसामान्यैः संयुक्तसमवेतसमवायः। श्रोत्रस्य शब्देन समवायः कर्णशुष्कुल्यवच्छिन्ननभसः श्रोत्रत्वात्, शब्दस्य चाकाशगुणत्वात्; तद्गतशब्दत्वादिसामान्यैः समवेतसमवायः। तथा चक्षुषो घटाभावेविशेषणविशेष्यभावः सन्निकर्षः। इह भूतले घटो नास्तीत्यत्र चक्षुः संयुक्तस्य भूतलस्य विशेषणत्वात्, घटाभावस्य विशेष्यत्वात्; घटाभाववद्भूतलमित्यत्र चक्षुः संयुक्तस्य भूतलस्य विशेष्यत्वम्। घटा भावस्य विशेषणत्वम्, एवं समवायग्रहे विशेषणविशेष्यभावः सन्निकर्षः – इह तन्तुषु पटसमवायः, पटसमवायवान्तस्तन्तव इत्यादि वदन्ति।

तदेतदसत्॥ गुणादीनां गुण्यादिभिरभेदेन समवायाभवात्, समवायसद्भावे प्रमाणाभावाच्च॥ आत्ममनः संयोगस्यान्यत्र प्रत्यासत्तित्वेऽपि आत्मनि तद्धर्मेषु च न तस्य तथात्वम्, आत्मनस्तद्धर्माणां च साक्षिविषयत्वेन मनोविषयत्वाभावात्॥ वर्णात्मकशब्दस्य द्रव्यत्वे आकाशगुणत्वाभावात्। न च सामान्यवत्त्वे सत्यस्मदादिबाह्यैकेन्द्रिग्राह्यत्वेन वर्णानां गुणत्वसिद्धेः कथं द्रव्यत्वमिति वाच्यम् । अस्मन्मते तमसि व्यभिचारात् परमते प्रदीपप्रभायां व्यभिचारात्॥ ध्वन्यात्मकशब्दस्य आकाशगुणत्वेऽपि तदभेदेन समवायाभावात्॥ विशेषण विशेष्यभावस्य स्वरपसम्बन्धत्वेन भिन्नसम्बन्धत्वाभावात्॥

## स्मृतेः मनोजन्यत्वसमर्थनम्

यत्केचिदाहुः- 'संस्कारमात्रजन्यज्ञानं स्मृतिः। प्रत्यभिज्ञानेऽति व्याप्तिवारणाय मात्रपदम्। संस्कारसम्प्रयोगाभ्यां जायमानं ज्ञानं प्रत्यभिज्ञानम्। सम्प्रयोगः संयोगः। संस्कारेत्यनुक्तौ अयं घट इति ज्ञानेऽतिव्याप्तिः। सम्प्रयोगेत्यनुक्तौ स्मृतावतिव्यापकमि'ति॥

तन्न। तथा सति 'यथार्थज्ञानमात्रस्य प्रमाणजन्यत्वनियमात् स्मृतेश्च यथार्थज्ञानत्वात्। तज्जनकसंस्कारस्यापि पृथक्प्रमाण्यापत्तेः॥ ततश्च तानि प्रमाणानि चत्वारीति विभागानुपपत्तेः॥ ननु इदं दूषणं भवतामपि समानमिति चेन्न। अस्माभिस्तु स्मृतेर्भावनासहकृतमानस – प्रत्यक्षजन्यत्वाङ्गीकारादिति।

## प्रत्यक्षस्य चातुर्विध्यम्

चतुर्विधं प्रत्यक्षम् – ईश्वरप्रत्येक्षं, लक्ष्मीप्रत्यक्षं योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति। विषयस्तु तत्तज्ज्ञानिषयवद्विवेक्तव्यः॥ अत्र विशेषस्तु पद्धत्युक्तरीत्या ज्ञातव्य इति सर्वमवदातम्॥

इति श्रीमज्जयतीर्थपूज्यपादप्रदर्शितमार्गानुवर्तिन्यां प्रमाणचन्द्रिकायां प्रत्यक्षपरिच्छेदः समाप्तः॥

# ॥ अथ अनुमान परिच्छेदः ॥

हरिः ओं॥

## अनुमानम्

अथानुमानं निरूप्यते – निर्दोषोपपत्तिरनुमानम्। उपपत्तिः, युक्तिः, लिङ्गं व्याप्यमिति पर्यायः।

उपपत्तिरनुमानमित्युक्ते आश्रयसिद्धे बाधिते चातिव्याप्तिः, तयोर्व्याप्त्याश्रयत्वेनोपपत्तित्वात्; अतो निर्दोषेति। तावत्युक्ते प्रत्यक्षादावतिव्याप्तिः, अत उपपत्तिरिति। अत्र लिङ्गं करणम्। परामर्शो व्यापारः। अनुमितिः फलम्॥ व्याप्तिप्रकारकपक्षधर्मताज्ञानं परामर्शः, यथा वह्निव्याप्यधूमवानयमिति ज्ञानम्। तज्जन्यं पर्वतोऽग्निमानिति ज्ञानमनुमिति।

## व्याप्तिः

यत्र दूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः॥ अत्र साहचर्यं हेतोः साध्येन सम्बन्धमात्रं विवक्षितम्, न तु सामानाधिकरण्यमेव। तस्य नियमो नियतत्वम्। अव्यभिचारितसाध्यसम्बन्धः व्याप्तिरित्यर्थः॥ साहचर्यनियम इत्येव व्याप्तिलक्षणम्। यत्र धूमस्तत्राग्निरिति व्याप्तिदर्शनम्॥ तत्र धूमो व्याप्यः, अग्निर्व्यापकः। व्याप्त्यधिकरणं व्याप्यम्। व्याप्तिनिरूपकं व्यापकम्। अत्र व्याप्यस्य पक्षधर्मत्वं नाम समुचितदेशववृत्तित्वं विवक्षितम्। अतो न कश्चित्क्षुद्रोपद्रवः।

केचित् - 'प्रतियोग्यसमानाधिकरणः साधनसमानाधिकरणो योऽत्यन्ताभावः तस्याप्रतियोगि यत्साध्यं तत्समानाधिकरण्यं व्याप्तिरित्यर्थः। साध्यसामानाधिकरण्यं व्याप्तिरित्युक्ते पर्वतोऽग्निमान् प्रमेयत्वादित्यत्रातिव्याप्तिः, तद्व्युदासाय साधनसामानाधिकरणा-त्यन्ताभावाप्रतियोगीति। तावत्युक्ते वृक्षः संयोगी द्रव्यत्वादित्यत्राव्याप्तिः, तत्परिहाराय प्रतियोग्यसमानाधिकरणेति। संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वान्न व्याप्तिः' इत्याहुः॥ तदसत् ॥ ऊर्ध्वदेशो वृष्टिमान् अधोदेशे नदीपूरात्, यदाऽधोदेशे नदीपूरः तदोर्ध्वदेशे वृष्टिः, यथा सम्प्रतिपन्नमित्यादि व्यधिकरणानुमानेऽव्याप्तेः॥ नन्विदं दूषणं भवतां समानमिति चेन्न, कार्यकारणभावरूपस्य अव्यभिचारितसम्बन्धस्य व्यधिकरणानुमाने सत्त्वादिति॥

## धर्माश्चतुर्विधाः

धर्माश्चतुर्विधाः– केचन समव्याप्ताः, केचन विषमव्याप्ताः, केचन परस्परपरिहारेणैव वर्तमानाः, केचित्क्वचित्समाविष्टा अपि परस्परपरिहारेणैव वर्तन्ते।

तत्र आद्या यथा निषिद्धत्वपापसाधनत्व-विहितत्वधर्मसाधनत्वादयः यत्र धर्मसाधनत्वं तत्र विहितत्वमिति द्रष्टव्यम्।

द्वितीया यथा – धूमवत्त्वाग्निमत्त्वकृतकत्वानित्यत्वादयः। यत्र धूमवत्त्वं तत्राग्निमत्त्वमिति व्याप्तेः। यत्राग्निमत्त्वं तत्र धूमवत्त्वमिति व्याप्तिर्नास्ति, अयोगोलके व्यभिचारात्॥ अत्र न्यूनदेशवृत्तिधूमवत्त्वं व्याप्यमेव। अधिकदेशवृत्त्यग्निमत्त्वं व्यापकमेव॥ एवं यत्र कृतकत्वं तत्रानित्यत्वमिति व्याप्तेः। यत्रानित्यत्वं तत्र कृतकत्वमिति व्याप्तिर्नास्ति, प्रागभावे व्यभिचारादिति द्रष्टव्यम्।

तृतीया यथा – गोत्वाश्वत्वगजत्वसिंहत्वादयः। यत्र गोत्वं न तत्र सर्वथाऽश्वत्वम्, यत्र अश्वत्वं न तत्र सर्वथा गोत्वम्। तयोर्नान्योन्यं व्याप्यव्यापकभावः, सम्बन्धस्यैवाभावात्। एवं यत्र गजत्वं न तत्र सर्वथा सिंहत्वम्, यत्र सिंहत्वं न तत्र गजत्वमिति द्रष्टव्यम्॥

चतुर्था यथा– पाचकत्वापुरुषत्वभूतत्वमूर्तत्वादयः। पाचकत्वपुरुषत्वयोः पुरुषविशेषे समावेशेऽपि पाचकत्वं पुरुषत्वपरिहारेण स्त्रीषु वर्तते, पुरुषत्वमपि पाचकत्वपरिहारेणापचति पुरुषे वर्तते॥ तावपि नान्योन्यं व्याप्यव्यापकभाववन्तौ सत्यपि सम्बन्धे परस्परव्यभिचारात्। एवं भूतत्वमूर्तत्वयोः क्वचित्समावेशेऽपि भूतत्वं मूर्तत्वपरिहारेणाकाशे वर्तते, मूर्तत्वं भूतत्वपरिहारेण मनसि वर्तत इति द्रष्टव्यम्।

तत्र व्याप्यो धर्मो व्यापकप्रमितिं जनयन्ननुमानमित्युच्यते व्यापकश्चानुमेय इति॥

## अनुमितिजननप्रकारः

ननु पर्वते वर्तमानो धूमो गृहान्तर्वर्तिनः पुरुषस्य किमित्यग्निप्रमां न जनयति? उच्यते। न प्रत्यक्षवदनुमानमज्ञातकारणम्।किं तु ज्ञातमेव॥ तथापि, नारिकेलद्वीपवासिनो देशान्तरगतस्य धूमप्रतीतावपि कस्मान्नाग्निप्रमोदयः? तस्य धूमस्वरूपज्ञानेऽपि अग्निव्याप्यतया तज्ज्ञानाभावात्॥ ज्ञातव्याप्तिकस्यापि कुतः कदाचिदग्निप्रमानुत्पत्तिः? व्याप्तिस्मरणाभावात्॥ तथा च व्याप्तिस्मरणसहितं सम्यग्ज्ञातं लिङ्गं समुचितदेशादौ लिङ्गिप्रमां जनयदनुमानमित्युक्तं भवति॥ अत

एव लिङ्गस्वरूपस्य ज्ञातत्वेऽपि देशविशेषादिसंसृष्टतया ज्ञापकत्वान्नानुमानवैफल्यम्॥ ततश्च अनुमानस्य द्वे अङ्गे – व्याप्तिः समुचितदेशादौ वृत्तिश्चेति। न तु पक्षधर्तानियमः॥

## व्याप्तिज्ञानजनकप्रमाणविचारः

ननु व्याप्तिज्ञानं केन प्रमाणेन जायते? यथायथं प्रत्यक्षानुमानागमैरिति ब्रूमः। तत्र तावद्धूमस्याग्निना व्याप्तिर्महानसादौ प्रत्यक्षगम्या। तत्र भूयोदर्शनव्यभिचारादर्शने सहकारिणी।

ननु वर्तमानसन्निकृष्टमात्रग्राहिप्रत्यक्षं सर्वोपसंहारेण कथमतीताद्यस्पदां व्याप्तिं गृह्णीयात्, प्रत्यासत्तेरभावादिति चेन्न। सामान्यलक्षणप्रत्यासत्तेरभावेऽपि सादृश्येनैव अतीतादिना प्रत्यासत्तिसम्भवेन सर्वोपसंहारेण व्याप्तिग्रहोपपत्तेः॥ अनुमानगम्यां तु व्याप्तिमुत्तरत्रोदाहरिष्यामः॥ यो ब्राह्मणः स न हन्तव्यः, यो गौः सा न पदा स्प्रष्टव्या, यद्विहितं तत्कर्तव्यमित्याद्यागमगम्या व्याप्तिर्द्रष्टव्या॥

## अनुमानविभागः

त्रिविधमनुमानम् – कार्यानुमानं, कारणानुमानं, अकार्यकारणानुमानं, चेति॥ यत्कार्यं कारणमनुमापयति तत्कार्यानुमानम्, यथा धूमो वह्नेरनुमापकः। यत्कारणं कार्यमनुमापयति तत्कारणानुमानम्, यथा इतरकारणविशिष्टमेघोन्नतिः वृष्टेरनुमापिका। यत्स्वसाध्यस्य कारणं न भवति कार्यं च न भवति अथ च तदनुमापकं तदकार्यकारणानुमानं, यथा रसो रूपस्यानुमापकः।

पुनर्द्विविधमनुमानम्– दृष्टं सामान्यतो दृष्टं चेति॥ तत्र प्रत्यक्षयोग्यार्थानुमापकं दृष्टं, यथा धूमोऽग्नेः। प्रत्यक्षायोग्यार्थानुमापकं सामान्यतो दृष्टम्, यथा रूपादिज्ञानं चक्षुरादेरिति॥

केचित् 'त्रिविधमनुमानम्– केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् इति।

## पक्षः

साध्यधर्मवान् धर्मी पक्षः। सपक्षादौ धर्मिण्यतिव्याप्तिवारणाय साध्यधर्मवानित्युक्तम्। यत्प्रतीतिर्लिङ्गेन जनयितव्या स साध्यो धर्मः, अतो नातिव्याप्तिः। साध्यधर्मवत्वं संयोगेन सम्बन्धेन हेतावप्यस्ति तद्वारणाय धर्मीति।

## सपक्षः

साध्यसमानाधर्मवान् धर्मी सपक्षः। महानसीयधूमेऽति व्याप्तिवारणाय धर्मिति। साध्यधर्मवान् धर्मी सपक्ष इत्युक्तेऽसम्भवः, पक्षेऽतिव्याप्तिः। साध्यधर्मवत्वं संयोगेन सम्बन्धेन हेतावप्यस्ति तद्वारणाय धर्मिति।

## विपक्षः

साध्यसमानधर्मरहितो धर्मी विपक्षः पक्षेऽतियाप्तिवारणाय साध्यरहितपदम्। सपेक्षेऽतिव्याप्तिवारणाय तत्समानरहितेति॥

पक्षव्यापकं सपक्षवृत्ति अविद्यमापक्षं केवलान्वयीनविपक्षं केवलान्वयि॥ अविद्यामानविपक्षं केवलान्वयीत्युक्ते 'सर्वमभिधेयं प्रमेयत्वादि'– त्यनुपरसंहारिण्यतिव्याप्तिः, अतः सपक्षवृत्तीति। सपक्षवृत्ति अविद्यमानविपक्षं केवलान्वयीत्युक्ते 'शब्दोऽभिधेयश्चाक्षुषत्वादिति' स्वरूपासिद्धेऽतिव्याप्तिः, तत्परिहाराय पक्षवृत्तीत्युक्तम्। तावत्युक्ते घटशब्दावभिधेयौ मूर्तत्वादिति भागासिद्धे अतिव्याप्तिः, तत्परिहाराय पक्षव्यापकमिति॥

तद्विविधम् सपक्षव्यापकतदेकदेशवृत्तिभेदात्। शब्दोऽभिधेयः प्रमेयत्वात् घटवदिति सपक्षव्यापकम्। तस्यामेव प्रतिज्ञायां गुणत्वाद्रूपवदिति सपक्षैकदेशवृत्तिः।

## द्विविधा व्याप्तिः

व्याप्तिर्द्विविधा – अन्वयतो व्यतिरेकतश्चेति। साधनस्य साध्येन व्याप्तिरन्वयव्याप्तिः, साध्याभावस्य साधनाभावेन व्याप्तिर्व्यतिरेकः॥ तत्र च व्याप्तौ साधनं व्याप्यं, साध्यं व्यापकम् व्यतिरेकव्याप्तौ तु साध्याभावो व्याप्यः साधनाभावो व्यापकः॥ सर्वत्र व्याप्यपुरस्सरेणैव व्याप्तिर्ग्राह्या।

## केवलान्वयिव्याप्तिः

अत्र प्रमेयत्वस्य केवलमन्वयव्याप्तिरेवास्ति; यत्प्रमेयं तदभिधेयम् यथा घट इति। न तु व्यतिरेकः, पदभिधेयं न भवति तत्प्रमेयं न भवति यथाऽमुकमिति दृष्टान्ताभावात्। सर्वस्याभिधेयत्वेन अनभिधेयत्वाभावात्॥ तेनैतत्केवलान्वयीत्युच्यते॥

## केवलव्यतिरेकि

पक्षव्यापकमविद्यमानसपक्षं, सर्वस्माद्विपक्षद्व्यावृत्तं, केवलव्यतिरेकि॥ विपक्षाद्व्यावृत्तं केवलव्यतिरेकीत्युक्ते पर्वतोऽग्निमान् पर्वतत्वादित्यादि व्यभिचारिण्यतिव्याप्तिः, तद्वारणाय सर्वस्मादिति। पर्वतत्वस्य निरग्निकमहाह्रदादेर्व्यावृत्तत्त्वेऽपि निरग्निकपर्वतादव्यावृत्तत्वेन सर्वविपक्ष-व्यावृत्तत्वाभावान्नातिव्याप्तिः॥ तावत्युक्तेऽन्वयव्यतिरेकिण्यतिव्याप्तिः, तत्परिहारायाविद्यमानसपक्षमिति। तावत्युक्ते जीवच्छरीरं सात्मकं चेतनत्वादिति स्वरूपासिद्धेऽतिव्याप्तिः तद्वारणाय पक्षवृत्तीति॥ तावत्युक्ते जीवेश्वरौ सर्वज्ञौ सर्वकर्तृत्वादिति भागासिद्धेऽतिव्याप्तिः, तद्वारणाय पक्षव्यापकमिति।

उदाहरणं तु ईश्वरः सर्वज्ञः सर्वकर्तृत्वादिति। अस्य यः सर्वज्ञो न भवति स सर्वकर्ता न भवति, यथा देवदत्त इति व्यतिरेकव्याप्तिरेवास्ति। न तु यः सर्वकर्ता स सर्वज्ञ इत्यन्वयव्याप्तिः, ईश्वरावताराणां रामकृष्णादीनां पक्षत्वात् अन्येषां जतीवानामसर्वज्ञत्वात्। तेनैतत्केवलव्यतिरेकीत्युच्यते।

## अन्वयव्यतिरेकि

पक्षव्यापकं सपक्षवृत्ति सर्वविपक्षव्यावृत्तमन्वयव्यतिरेकि। विपक्षव्यावृत्तमन्वयव्यतिरेकीत्यङ्गीकारे जीवच्छरीरमनित्यं पृथिवीत्वादिति व्यभिचारिण्यतिव्याप्तिः, पृथिवीत्वस्य नित्ये गगनादाववृत्तेः, अतः सर्वेति। तत्र वृथिवीत्वस्य नित्यगगनादाववृत्तावपि नित्ये पार्थिवपरमाणौ वृत्तेः सर्वविपक्षव्यावृत्तत्वभाव इति ज्ञेयम्॥

सर्वविपक्षव्यावृत्तमन्वयव्यतिरेकीत्युक्ते केवलव्यतिरेकिण्यतिव्याप्तिः । तावत्युक्ते देवदत्तादावतिव्याप्तिः, तद्वारणाय सपक्षवृत्तीति। तावत्युक्ते देवदत्तः सर्वज्ञः सर्वकर्तृत्वादिति स्वरूपासिद्धेऽतिव्याप्तिः, अतः पक्षवृदत्तीत्युक्तम्। तावत्युके पर्वतह्रदौ वह्निममन्तौ धूमवत्त्वादिति भगासिद्धेऽतिव्याप्तिः, तद्वारणाय पक्षव्यापकमिति। धूवत्वस्य ह्रदेऽभावेन पक्षव्यापकत्वाभावात्।

तद् द्विविधम्– सर्वसपक्षवृत्तितदेकदेशवृत्तिभेदात्॥ जीवो नित्यः विनाशकारणशून्यत्वादिति सपक्षव्यापकम्, सर्वस्मिन् नित्ये गगनादौ विनाशकारणशून्यत्वस्य वृत्तेः। पर्वतोऽग्निमान् धूवत्त्वादिति सपक्षैकदेशवृत्तिः, अग्निमत्यपि क्वचिद् धूमवत्वस्यावृत्तेः। इदं हि यो धूमवान् सोऽग्निमान् यथा महानसः, योऽग्निमान्न भवति स धूमवान्न भवति यथा महाह्रद इति व्याप्तिद्वयवदन्वयव्यतिरे।कीत्युच्यत' इत्याहुः।

## अनूदितव्याप्तिविभागव्युदासः

तदिदमसत्। व्यतिरेकव्याप्तेः प्रकृतसाध्यसिद्धावनुपयोगात्। न हि भावेन भावसाधने अभावस्याभावेन व्याप्तिरुपयुज्यते। व्याप्तिपक्षधर्मतयोर्वैयधिकरण्यं चैवं सति स्यात्। कथं तर्हि केवलव्यतिरेकिणः संव्यवहारः? इत्थम् । तत्रापि यस्सर्वकर्ता स सर्वज्ञ इत्येव व्याप्तिः। किन्तु व्याप्तिग्रहणस्थानस्यैव विप्रतिपत्तिविषयत्वेन सा दर्शयितुमशक्याऽभूत्। ततोऽनुमानेन तां साधयितुं व्यतिरेकव्याप्तिरुपयुज्यते। सर्वकर्तृत्वादिति प्रयुक्ते कथमस्य व्याप्तिरित्याकाङ्क्षायां सर्वकर्तृत्वं सर्वज्ञत्वेन व्याप्तं तदभावव्यापकाभावप्रतियोगित्वात्, यद्यदभावव्यापकाभाव प्रतियोगि तत्तेन व्याप्तम् यथा धूमवत्त्वमग्निमत्त्वेनेत्यस्यार्थस्य विवक्षितत्वात्॥ अन्वयव्यतिरेकिणि तु व्यतिरेकव्याप्तिरनुपयुक्तैव। विवक्षितव्याप्तेः प्रत्यक्षादिनैव सिद्धत्वात्। व्यभिचाराभावप्रदर्शनमुखेन कथञ्चिदुपयुज्यते।

## पुनरनुमानविभागः

पुनरनुमानं द्विविधम् – स्वार्थं परार्थं चेति।

तत्र स्वार्थं स्वप्रमितिहेतुः। स्वयमेव भूयोदर्शनेन महानसादौ यत्र धूमस्तत्राग्निरिति व्याप्तिं गृहीत्वा तदनन्तरं पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति 'यत्र धूमस्तत्राग्नि'रिति। तदनन्तरं पर्वतसमीपं गतस्य वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते तत्स्वार्थानुमानम्। अयं लिङ्गपरामर्श इत्युच्यते। तस्माद्वह्निमानिति ज्ञानमुत्पद्यते।

यत्तु धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते 'पर्वतो वह्निमान् , धूमवत्त्वात्, यो यो धूमवान् स सोऽग्निमान् यथा महानसः, तथा चायं, तस्मात्तथा' इति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते। एतदेव परार्थानुमानमित्युच्यते॥

## अनुमानावयवाः

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति पञ्चावयवाः।

१. साध्यवत्तया पक्षवचनं प्रतिज्ञा, यथा पर्वतोऽग्निमानिति॥

२. साधनत्वव्यञ्जकविभक्त्यन्तं लिङ्गवचनं हेतुः, यथा धूमवत्त्वादिति।

३. व्याप्तिग्रहणस्थलं दृष्टान्तः। स द्विविधः– साधर्म्यदृष्टान्तो वैधर्म्यदृष्टान्तश्चेति। तत्रान्वयव्याप्तिग्रहणस्थलं साधर्म्यदृष्टान्तः, यथा धूमानुमाने महानसः। व्यतिरेकव्याप्तिग्रहणस्थलं वैधर्म्यदृष्टान्तः, यथा तस्मिन्नेवानुमाने महाह्रदः॥

व्याप्तिप्रदर्शनपूर्वकं दृष्टान्तवचनमुदाहरणम्। तद्विविधम् – साधर्म्योदाहरणं, वैधर्म्योदाहरणं चेति॥ अन्वय व्याप्तिप्रदर्शनपूर्वकं साधर्म्यदृष्टान्तभिधानं साधर्म्योदाहरणम्, यथा यो धूमवान् सोऽग्निमान् यथा महानस इति। व्यतिरेकव्याप्तिप्रदर्शनपूर्वकं वैधर्म्यदृष्टान्ताभिधानं वैधर्म्योदाहरणम्, योऽग्निमान्न भवति स धूमवान्न भवति यथा महाह्रद इति।

४.दृष्टान्ते प्रसिद्धव्याप्तिकस्य लिङ्गस्य पक्षवृत्तित्वख्यापकं वचनमुपनयः। सोऽपि दृष्टान्तानुसारेण द्विविधः – तत्र, महानस इवायं पर्वतोऽपि धूमवानिति साधर्म्योपनयः। न च ह्रद इवायं निर्धूमः पर्वत इति वैधर्म्योपनयः॥

५. सहेतुकं पक्षवचनं निगमनम्, यथा 'तस्मात्पर्वतोऽग्निमानिति'॥ तदेतदसत्, व्याप्तिद्वैविध्यनिराकरणेनोदाहरणद्वैविध्यास्यापि निराकृतत्वात्, पञ्चावयवादिनियमानुपपत्तेश्च। नियमखण्डनप्रकारः पद्धत्युक्तरीत्या ज्ञेयः॥ इत्यनुमाननिरूपणम्।

## उपपत्तिदोषाः

अथोपपत्तिदोषा निरूप्यन्ते॥ उपपत्तिदोषो द्विविदः – विरोधासङ्गतिभेदात्।

तत्र विरोधस्त्रिविधः –प्रतिज्ञाविरोध-हेतुविरोध-दृष्टान्तविरोधभेदात्। तत्र प्रतिज्ञाविरोधो द्विविधः – प्रमाणविरोध-स्ववचनविरोधभेदात्। तत्र प्रमाणविरोधोऽपि द्विविधः – प्रबलप्रमाणविरोधसमबलप्रमाण विरोधभेदात्।

तत्र प्रबलप्रमाणविरोधस्योदाहरणं तु 'विमतं मिथ्या दृश्यत्वात्, यद्दृश्यं तन्मिथ्या यथा शुक्तिरजतम्' इति। अत्र सन् घट इत्यादिप्रत्यक्षेण, विमतं सत्यं अर्थक्रियाकारित्वात्सम्प्रतिपन्नवदित्याद्यनुमानेन, विश्वं सत्यमित्याद्यागमेन च , जगतः सत्यत्वावधारणात्प्रबलप्रमाणविरोधो द्रष्टव्यः॥ समबलप्रमाणमविरोधस्योदाहरणं तु 'विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवत्, विमतं सत्यं प्रामाणिकत्वादात्मवत्' इति॥ अत्रानुमानद्वये व्याप्तिपक्षधर्मतयोः साम्यात्समबलप्रमाणविरोधो ज्ञातव्यः।

| |
|---|
| स्ववचननविरोधो द्विविधः – अपसिद्धान्तजातिभेदात्। तत्र पूर्वाचार्यैर्यत्प्रामाणिकतया अभ्युपगतं तद्विरुद्धाङ्गीकारोऽपसिद्धान्तः। पूर्वाचार्यवचनस्यापि स्वयमङ्गीकृतत्वेन स्ववचनत्वादपसिद्धान्तः स्ववचनविरोधो भवति। यथा निरीश्वरसाङ्ख्यमते ईश्वराङ्गीकारः॥ |
| स्ववचन एव स्वव्याहतर्जातिः। यथा मे माता वन्ध्येत्यादि। |
| हेतुविरोधोऽपि द्विविधः – स्वरूपासिद्धिरव्याप्तिश्चेति॥ स्वरूपासिद्धेरुदाहरणं तु, शब्दोऽनित्यश्चाक्षुषत्वादिति। अत्र चाक्षुषत्वं शब्दे नास्ति, तस्य श्रावणत्वात्॥ |
| अव्याप्तिश्च त्रिधा – लिङ्गस्य साध्येन तदभावेन च सम्बन्धः, साध्यसम्बन्धाभावे सति तदभावेनैव सम्बन्धः, उभयसम्बन्धाभावश्चेति। तत्राद्यो यथा -शब्दोऽनित्यः प्रमेयत्वादिति। द्वितीयो यथा – शब्दो नित्यः कृतकत्वादिति। तृतीयो यथा– सर्वमनित्यं सत्त्वादिति; अत्र सर्वस्य पक्षत्वेनोभयसम्बन्धो नास्ति॥ |
| दृष्टान्तविरोधो द्विविधः- साध्यवैकल्यं साधनवैकल्यं चेति॥ आद्यं यथा – मनोऽनित्यं मूर्तत्वात् परमाणुवदिति। द्वितीयं यथा – अत्रैवानुमाने यथा कर्मेति॥ |
| असङ्गतेरुदाहरणं तु, ईश्वरवादिनं प्रति 'क्षित्यादिकं सकर्तृकं कार्यत्वात्पटवत्' इति। अत्रानाकाङ्क्षितसाधनाय प्रयुक्तत्वादित। आकाङ्क्षा रहोऽसङ्गतिरिति तल्लक्षणादिति॥ |
| अन्ये तु 'पक्षधर्मत्वं, सपक्षसत्त्वं, विपक्षाद्व्यावृत्तिः, अबाधितविषयत्वं, असत्प्रतिपक्षत्वं चेति हेतोः, पञ्च रूपाणि॥ तत्रान्वयव्यतिरेकिणः पञ्चापि विवक्षितानि। केवलान्वयिनस्तु चत्वारि रूपाणि, तस्य विपक्षाभावेन विपक्षव्यावृत्तत्वाभावात्। केवलव्यतिरेकिणोऽपि चत्वारि रूपाणि, तस्य सपक्षाभावेन सपक्षसत्वानुपपत्तेः। |
| तन्न ॥ विवक्षितरूपेषु कतिपयसहिताः कतिपयरहिता हेत्वाभासाः॥ ते चासिद्धविरुद्धानैकान्तिककालात्ययापदिष्टसत्प्रतिपक्षाख्याः पञ्च हेत्वाभासाः॥ |
| व्याप्तिपक्षधर्मतान्यतरविकलो हेतुरसिद्धिः। स च त्रिविधः– आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। |
| तत्राश्रयासिद्धो द्विविधः – असदाश्रयः सिद्धसाधकश्चेति। |

| |
|---|
| आद्यो यथा – गगनारविन्दं सुरभि अरविन्दत्वात्सरोजारविन्दवत्, अत्र गगनारविन्दमाश्रयः स च नास्त्येव। द्वितीयो यथा ईश्वरवादिनं प्रति क्षित्त्यादिकं सकर्तृकं कार्यत्वात्पटवत्' इति। अत्र साध्यस्य विनिश्चितत्वेन पक्षे साध्यसन्देहानुपपत्तौ साद्यवतः पक्षस्याभावादाश्रयासिद्धिर्बोध्या। |
| स्वरूपासिद्धो यथा – शब्दोऽनित्यश्चाक्षुषत्वादिति। अत्र चाक्षुषत्वं हेतुः। स च शब्दे नास्ति, शब्दस्य श्रवणत्वात्। |
| व्याप्यत्वासिद्धो द्विविधः – साध्यसम्बन्धरहितः, सोपाधिकसम्बन्धश्चेति॥ आद्ये यथा – सर्वं क्षणिकं सत्त्वादिति। अत्र सर्वस्य पक्षत्वेन पक्षातिरिक्तसपक्षाभावात्साध्य सम्बन्धाभावो ज्ञेयः॥ |
| द्वितीयो यथा – वैधी हिंसा पापसाधनं हिंसात्वात् ब्राह्मणहिंसावदिति। हिंसात्वपापसाधनत्वयोः सम्बन्धे निषिद्धत्वस्योपाधेः सत्वात्। |
| साध्यव्यापकत्वे सति साधनाव्यापक उपाधिरिति उपाधिलक्षणम्॥ यत्राधर्मसाधनत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता। यत्र हिंसात्वं तत्र निषिद्धत्वमिति नास्ति पक्षे पिंसात्वस्य सत्त्वेऽपि निषिद्धत्वस्याभवात्। |
| ननूपाधिः कथं दोषः, इति चेदित्थम् – उपाधिर्व्यभिचारोन्नायकत्वेन, प्रतिपक्षोन्नायकत्वेन वा दोषो भवति। तत्र निषिद्धत्वं साधनव्यापकत्वात् पक्षान्निवर्तमानं सत्साध्यव्यापकत्वात्स्वव्याप्यं अधर्मसाधनत्वं निवर्तयद्धिंसात्वस्य साध्याभावसम्बन्धमापादयति। व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यक त्वात्। ततश्च पक्षस्यैव विपक्षत्वप्राप्त्या तत्र विद्यमानो हेतुरनैकान्तिको भवति॥ प्रतिपक्षोन्नायकत्वं त्वित्थम् – उपाधिः स्वयं पक्षात् व्यावर्तमानः स्वव्याप्यं साध्यं व्यावर्तयति। |
| ततश्चोपाध्यभावः साध्याभावसाधने हेतुर्भवति। वैधी हिंसा अधर्मसाधनं न भवति अनिषिद्धत्वात् भोजनवदिति। एवं च सोपाधिकत्वाद्धिंसात्वं व्याप्यत्वासिद्धमिति ज्ञेयम्। |
| उपाधिश्चतुर्विधः –केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनधर्मावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्न साध्यव्यापकश्चेति॥ |
| आद्यो यथा – पर्वतो धूमवानाग्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः॥ |
| द्वितीयो यथा – वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वम्। अत्र बहिर्द्रव्यत्वं पक्षधर्मः॥ अत्रोद्भूतरूपवत्त्वस्य केवलसाध्यव्यापकत्वं नास्ति। गुणादौ प्रत्यक्षत्वसद्भावेऽपि |

| |
|---|
| उद्भूतरूपवत्त्वाभावात्, अतो द्रव्यत्वावच्छिन्नेत्युक्तम्। तथाप्यात्मनि न साध्यव्यापकता, अतो बहिर्द्रव्यत्वावच्छिन्नेत्युक्तम्॥ |
| तृतीयो यथा – गर्भस्थः श्यामो भवितुमर्हति मैत्रीतनयत्वादित्यत्र मैत्रीतनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वम्। अत्रापि शाकपाकचत्वस्य केवलसाध्यव्यापकत्वं नास्ति, घटादौ श्यामत्वसद्भावेऽपि शाकपाकजत्वाभावात्; अतो मैत्रीतनयत्वावच्छिन्नेत्युक्तम्। |
| चतुर्थो यथा– परमाणुस्वरूपं प्रत्यक्षं प्रमेयत्वात् घटवदित्यत्र बहिर्द्रव्यत्वावच्छिन्न प्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वम्। अत्र बहिर्द्रव्यत्वमुदासीनो धर्मः, अस्य पक्षधर्मत्वाभावात्, साधनत्वाभावाच्च। अत्र यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकता नास्ति, गुणादौ व्यभिचारात्, अतो बहिर्द्रव्यत्वावच्छिन्नेत्युक्तम्। तथा च, यत्र बहिर्द्रव्यत्वावच्छिन्नाप्रत्यक्षत्वं तत्रोद्भूतरूपमिति साधनव्यापकता नास्ति, पक्षे व्यभिचारात्। |
| उपाधिलक्षणे तु, साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वात् इत्यत्र घटत्वमुपाधिः स्यात्, कृतकत्ववति शब्दे घटत्वस्याभावात् अतः उक्तं साध्यव्यापकत्वे सतीति। साध्यव्यापक उपाधिरित्युक्ते धूमानुमाने द्रव्यत्वमुपाधिः स्यात्, अत उक्तं साधनाव्यापकेति। |
| साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि, नित्यत्वाभावेनानित्यत्वेन व्याप्तम्। |
| सव्यभिचारोऽनैकान्तिकः। स त्रिविधः – साधारण- असाधारणानुपसंहारिभेदात्॥ |
| तत्र साध्याभाववद्वृत्तिः साधारणानैकान्तिकः। पर्वतोऽग्निमान् प्रमेयत्वादिति। प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्॥ सर्वसपक्षविपक्षव्यावृत्तः पक्ष एव वर्तमानो हेतुरसाधारणानैकान्तिकः। भूः नित्या गन्धवत्त्वादिति। गन्धवत्त्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं भूमात्रवृत्ति॥ |
| अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति। |
| यस्य साध्याभावः प्रमाणेन निश्चितः स कालात्ययापदिष्टः। अयमेव बाधित इति चोच्यते। यता सर्वं तेजोऽनुष्णं पदार्थत्वादित्यत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति। |

साध्याभावसाधकं हेत्वन्तरं यस्य विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रवणत्वात् शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वात् घटवदित्यनेन प्रतिरुद्धत्वात्। अयमेव प्रकरणसम इति चोच्यते।

तथोदाहरणरहिता उदाहरणवदवभासमाना उदाहरणाभासाः। ते चानेकप्रकाराः।

तत्र साधर्म्योदाहरणे तावत्साध्यवैकल्यं यथा– मनोऽनित्यं मूर्तत्वात् यत् मुर्तं तदनित्यं यथा परमाणुरिति।

परमाणावनित्यत्वाभावात् साध्यवैकल्यम्॥ साधनवैकल्यं यथा – अत्रैवानुमाने कर्मेति। कर्मणोऽनित्यत्वेऽपि मूर्तत्वाभावात्॥ उभयवैकल्यं यथा– अस्मिन्नेवानुमाने यताऽऽकाश इति।

वैधर्म्योदाहरणे साध्याभाववैकल्यं यथा– तत्रैवानुमाने यथा कर्मेति। साधनाभाववैकल्यं यथा– तत्रैवानुमाने, यदनित्यं न भवति तन्मूर्तं न भवति यथा परमाणुरिति। उभयाभाव वैकल्यं यथा– तस्मिन्नेवानुमाने यथा घटः इति वदन्ति।

तदेतदसत्, केषाञ्चिददूषणत्वात्, केषाञ्चित् प्रमाणविरोधादिष्वन्तर्भावात्। केषाञ्चिददूषणत्वप्रकारः अन्तर्भावप्रकारश्च पद्धत्युक्तरीत्या ज्ञातव्यः। विस्तरभयान्नेहोच्यते॥ इति सर्वं समञ्जसम्॥

**इति श्रीमज्जयतीर्थपूज्यपादप्रदर्शितमार्गानुवर्तिन्यां प्रमाणचन्द्रिकायां अमानपरिच्छेदः समाप्तः॥**

# अथ आगमपरिच्छेदः

## आगमः

हरिः ओं॥

अथागमो निरूप्यते। निर्दोषः शब्द आगमः। आगमाभासेऽतिव्याप्तिवारणाय निर्दोषेति। प्रत्यक्षादावतिव्याप्तिवारणाय शब्द इति।

## शब्ददोषाः

अबोधकत्वं विपरीतबोधकत्वं ज्ञातज्ञापकत्वमप्रयोजनत्वमनभिमत-प्रयोजनत्वमशक्यसाधनप्रतिपादनं लघूपाये सति गुरूपायोपदेशनमित्यादयः शब्ददोषाः॥

अत्राबोधकत्वं च द्वेधा निरभिधेयत्वेनान्वयाभावेन चेति। यत्राद्यस्योदाहरणं – कचटतपानां जपगडदत्वादित्यादि। द्वितीयस्योदाहरणं – गौरश्वः पुरुषो हस्तीति, कुण्डमजाजिनं दशदाडिमानि

षडपूपा इत्यादि॥ विपरीतबोधकत्वस्य उदाहरणं – विमतं मिथ्या, शूद्राणां वेदाधिकारोऽस्ति, ब्राह्मणानं नास्तीत्यादि॥ ज्ञातज्ञापकत्वस्योदाहरणं तु –पुरस्तादादित्य उदेति, पश्चादस्तमेति, मधुरो गुडः, तिक्तं निम्बफलमित्यादि। न च 'प्रमाणान्तरसंवादश्च दार्ढ्यहेतुरेवे'त्युक्तत्वेन कथं ज्ञातज्ञापकत्वस्य दोषत्वमिति वाच्यम्, पूर्वप्रवृत्तप्रमाणेनाप्रामाण्यशङ्काकलङ्कितेनार्थानिर्णये तु उत्तरोत्तरप्रवृत्तप्रमाणानां तन्निर्णायकत्वेन दार्ढ्यहेतुत्वस्य तदर्थत्वात्॥ अप्रयोजनत्वस्योदाहरणं

काकस्य कति वा दन्तामेषस्याण्डं कियत् फलम्।
कम्बले कति रोमाणि का वार्ता चोलमण्डले' इत्यादि॥

अनभिमतप्रयोजनवत्त्वस्योदाहरणं विरक्तं प्रति वाणिज्योपदेश इत्यादि॥ अशक्यसाधनप्रतिपादकत्वस्योदाहरणं – मृतमुद्दिश्य मृतिहरहिममहीधरोत्तर-सानुसिद्धमृतसञ्जीविनीकथनादि॥ लघूपाये सति गुरूपायोपदेशनस्योदाहरणं – नखेन जायमानं कार्यं कुठारेण कुर्विति तृषितं प्रति गीर्वाणतरङ्गिणीतीरे कूपखननोपदेश इत्यादि॥

## पद-वाक्यम्

शब्दः पदवाक्यात्मकः। विभक्त्यन्ता वर्णाः पदम्। जबगडदेत्यादिवर्णसमूहेऽतिव्याप्तिवारणाय विभक्त्यन्ता इति।

आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहो वाक्यम्।

## आकांक्षा

यस्य येन विना वाक्यार्थान्वयाननुभवकत्वं तस्य तेनाकाङ्क्षा; यथा घटमानयेत्यत्र क्रियापदस्य कर्मपदेन विना क्रियाकर्मभावान्वय बोधजनकत्वमित्यानयपदस्य घटपदेन सहाकाङ्क्षा। अथ वा पूर्वपदसञ्जाताकाङ्क्षापूरकत्वमाकाङ्क्षाच अत एव गौरश्वः पुरुषो हस्तीति न वाक्यम्, परस्परान्वयविरहात्। यद्यप्याकाङ्क्षा चेतनधर्मः, तथापि अर्थास्तावत् स्वपदश्रोतुरन्योन्यविषयाकाङ्क्षाजनकत्वेन साकाङ्क्षा इत्युच्यन्ते। तत्प्रतिपादकत्वात्पदान्यपि साकाङ्क्षाणीत्युच्यन्ते।

## योग्यता

प्रतीतान्वयस्य प्रमाणविरोधाभावो योग्यता। यथा जलेन सिञ्चतीत्यत्र जलसेचनयोः कार्यकारणभावसंसर्गस्याबाधितत्वात् सेचनस्य जलेन सहान्वयो योग्यता। अत एवाग्निना सिञ्चतीति न वाक्यम्; योग्यताविरहात् । न ह्यग्निसेचनयोः परस्परान्वययोग्यतास्ति॥

## सन्निधिः

अविलम्बेनोच्चरितत्वं सन्निधिः। यथाऽव्यवधानेनोच्चरितानि गामानयेत्यादिपदानि सन्निधिमन्ति। अत एव प्रहरे प्रहरेऽसहोच्चरितानि गामानयेत्यादीनि न वाक्यम् सन्निध्यभावात्।

अत्र वाक्यं करणं पदार्थस्मृतिरवान्तरव्यापारः वाक्यार्थज्ञानं फलम्। आगमोऽपि शक्तिग्रहादिसंयुतः सम्यक् श्रुत एवार्थस्य बोधको न प्रत्यक्षवत्सत्तामात्रेण, आगमस्यानुमानवत् ज्ञातकरणत्वात्। अन्यथा आगमस्य स्वरूपतः सत्त्वेऽपि तदश्राविणः श्रवणेऽप्यगृहीतसङ्गतिकस्य वा पुंसः स्वार्थप्रमापकत्वापत्तेः।

## शक्तिविचारः

'गवादिपदानां' जातावेव शक्तिः, विशेषणतया जातेः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्त्वाक्षेपा'दिति केचित्। 'जातिविशिष्टा व्यक्तयो वाच्याः। अत्र जातिशब्दः शब्दप्रवृत्तिनिमित्तपरः। तथा चाकाशाद'यः सर्वेऽपि शब्दाः प्रवृत्तिनिमित्तविशिष्टवस्तुवाचिन इत्यपरे। घटादिशब्देषु जातिः, देवदत्तादिसंज्ञाशब्देषु व्यक्तिः, सास्नादिमच्छब्देषु आकृतिः, गवादिशब्देशु त्रितयमपी'त्येके।

वस्तुतस्तु, यस्माच्छब्दाज्झटिति यावन्तोऽर्थाः प्रतीयन्ते तावन्तस्तच्छब्दवाच्याः। सादृश्यं तु शक्तिग्रहे प्रत्यसत्तिरूपम्।

यथा घटशब्देन घटघटत्वयोः प्रतीयमानत्वात्स शब्दः तत्र शक्तः, शुक्लशब्दः गुणगुणिनोः शक्तः, गतशब्दः इत्यादि द्रष्टव्यम्। यद्वा, गवादिपदानां विशेष्यतया व्यक्तय एव वाच्याः, आनयनादिकं तु विशेषणत्वादिना वाच्यम्, गामानयेत्यादौ सर्वत्रानयनादेः व्यक्तावेव शक्तिकल्पनात्।

शक्तिग्रहश्चाङ्गुलिप्रसारणादपूर्वकनिर्देशेनैव भवति। तथा हि, मातुः पितुर्वा अङ्के स्थितं बालमन्यमनस्कं सन्तं अङ्गुलिप्रसारणछोटिकावादनाभ्यां स्ववचनश्रवणाभिमुखं मात्राद्यभिमुखं च विधाय यथा व्युत्पादयिता वाक्यं प्रयुङ्क्ते, 'बाल! तवेयं माता, तव पिताऽयम्, ते भ्राताऽयं

कदलीफलमभ्यवहरती'त्यादि, तदा तेन निर्देशेनैव तस्य शब्दसमुदायस्य तस्मिन्नर्थसमुदाये वाच्यवाचकभावसम्बन्धं तावत्सामान्यतोऽवगच्छति बालः, 'इदमनेनायं बोधयती'ति॥ पुनः 'इयं मे स्वसा, अयं ते सखा अपूपं खादति' इत्यादि प्रयोगान्तरेषु शब्दार्थयोरावपोद्वापाभ्यां शब्दभेदादिकमवगम्य मात्रादिपदानां जनन्यादौ विशेषतो वाचकत्वमवगच्छतीति।

अपरे तु, 'शक्तिग्रहस्य वृद्धव्यवहारात्। तथा हि, व्युत्पित्सुः बालो गामानय इत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपगम्य गवानयनं दृष्ट्वा मद्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य 'अश्वमानय, गांबधाने'ति वाक्यानन्तरे आवापोद्वापाभ्यां गोपदस्य गोव्यक्तौ शक्तिः, अश्वपदस्य अश्वव्यक्तौ शक्तिरिति व्युत्पद्यत' इत्याहुः। तन्न। शश्वद्विस्मरणशीलस्य बालस्य एष्यदानयनपर्यन्तं शब्दानुसन्धानाद्यनुपपत्तेः।

## वृत्तिः

वृत्तिर्द्विविधा – मुख्या, अमुख्या चेति।

तत्र शक्तिर्मुख्या वृत्तिः। अर्थस्मृत्यनुकूलपदार्थसम्बन्धः शक्तिः। सा च समयसङ्गतिसङ्केतवाचकत्वादिभिर्व्यवह्रियते॥ सा शक्तिस्त्रिविधा — योगः, रूढिः, योगरूढिश्चेति॥ तत्रावयवशक्तिर्योगः॥ समुदायशक्ती रूढिः। उभयशक्तिर्योगरूढिः।

तत्र केचन शब्दा योगेनैवार्थबोधकाः। ते च पाचक पाठकदण्डकुण्डल्यादयः। केचन रूढ्यैव अर्थबोधकाः। ते च घटपटादयः। केचन उभाभ्यामर्थप्रत्यायकाः। ते च पङ्कजादयः॥ एवमन्या अपि महायोगाद्याः मख्यवृत्तयो ज्ञेयाः।

लक्षणं त्वमुख्या वृत्तिः। शक्यसम्बन्धो लक्षणा॥ सा द्विविधा – जहल्लक्षण अजहल्लक्षणा चेति। यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा, यथा गङ्गायां घोष इत्यादौ यत्र वाच्यार्थस्याप्यन्वयः तत्राजहल्लक्षणा, यथा छत्रिणो यान्तीत्यादौ।

सा पुनर्द्विविधा — प्रयोजननिरपेक्षा, प्रयोजनसापेक्षा चेति॥ तत्राद्या यथा — मार्गश्चलन्तीति। इयं प्रयोजनाभावेऽपि प्रतीयमानत्वाद्रूढलक्षणेत्युच्यते। द्वितीया यथा — गङ्गायां घोष इति। इयं च पावित्र्याज्ञेयाः॥

## द्विविधः आगमः

आगमो द्विविधः — अपौरुषेयः पौरुषेयश्चेति। तत्रापौरुषेयः ऋगादिसदागमाः, पौरुषेयो भारतादिसदागमाः। तदुक्तम् — आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च। ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्॥ मूलरामायणं चैव पुराणं चैतदात्मकम्। ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः॥ दुरागमास्तदान्ये ये तैर्न ज्ञेयो जनार्दनः' इति॥

## वेदापौरुषेयत्वप्रामाण्यस्थापनम्

ननु वेदः पौरुषेयः वाक्यसमूहत्वात् कालिदासादिवाक्यावदिति चेन्न, श्रूयमाणकर्तृकत्वस्योपाधित्वात्।

ननु वेदो न प्रमाणं तदुक्तानुष्ठानेऽपि फलानुपलम्भात् विप्रलम्भकवाक्यवदिति चेन्न । वेदः प्रमाणमेव अपौरुषेयवाक्यत्वात् व्यतिरेकेणोन्मत्तवाक्यवदिति युक्तिविरुद्धत्वात्। न चासिद्धिः 'वाचा विरूपनित्यया' इत्यादिश्रुतेः, 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा' इति स्मृतेश्च। न च फलविसंवादादप्रमाण्यम्। अधिकारिणां फलोपलम्भेन तदनुपलम्भस्य कर्तृवैगुण्यादिनिमित्तकत्वादिति।

## आगमस्य पृथक्प्रामाण्यव्यवस्थापनम्

ननु आगमो न प्रमाणं, निर्विषयत्वात् विप्रलम्भकवाक्यवत्। तथा हि विषयो द्विविधः —अपरोक्षः परोक्षश्चेति। तत्राद्यः प्रत्यक्षस्य विषयः, द्वितीयस्त्वनुमानस्य विषयः। न चातिरिक्तं विषयमीक्षामहे, येन विषयेण आगमः प्रमाणं स्यात्। यद्यप्यागमः परोक्षज्ञानजनकः, तथापि त्वन्मते ज्ञातज्ञापकस्य सिद्धसाधकस्य मानान्तरविषये प्रवर्तमानत्वादप्रामाण्यम्। एवं सर्वोऽप्यागमः असङ्कीर्णविषयाभावादप्रमाणमिति चेन्न; यथाऽपरोक्षविषयत्वाविशेषेऽपि आगमप्रामाण्यस्यावर्जनीयत्वात्। न हि स्वर्गापवर्गादिगतो विशेषोऽनुमानवेद्यः, येनागमस्य निर्विषयत्वं स्यात्। अन्यथा परोक्षविषयत्वादागम एव प्रमाणम्, अनुमानं तु निर्विषयत्वादप्रमाणमेवेति स्यादिति।

आगमोऽनुमान एन्तर्भवतीति वैशेषिकाः। तदसत्, व्याप्त्याद्यननुसान्धानेऽपि वाक्यार्थप्रतीतेरनुभवसिद्धत्वात्।

अपौरुषेयः पृथक् प्रमाणं पौरुषेयस्त्वनुमानमिति भास्करः (प्राभाकरः)। तदप्यसत्। उभयत्र वाक्यार्थबोधकाकाङ्क्षा-योग्यतादिसामग्रीसाम्ये सति विशेषकल्पकाभावात्।

## अर्थापत्त्यादीनामुक्तेष्वंतर्भावसमर्थनम्

तदेवं वर्णितानि त्रीणि प्रमाणानि। एतेभ्योऽन्यन्न प्रमाणम्॥

नन्वर्थापत्तिरपि पृथक्प्रमाणमस्ति। अनुपपद्यमानार्थदर्शनात्तदुपपादके बुद्धिरर्थापत्तिः। जीवंश्चैत्रो गृहे नास्तीति श्रुते दृष्टे वा चैत्रस्य बहिस्सत्त्वं कल्प्यते। जीवतो गृहेऽसत्त्वं बहिर्भावं विना नोपपद्यते, अतो गृहेऽसत्त्वान्यथानुपपत्तिप्रसूतार्थापत्तिरेव बाहिस्सत्त्वे प्रमाणम्. तच्च प्रत्यक्षादिभ्यो भिन्नम्।

बहिर्भावस्य प्रत्यक्षाद्यविषयत्वात्। मैवम्, अर्थापत्तेरनुमान एवान्तर्भावात्। चैत्रो बहिरस्ति जीवित्त्वे सति गृहेऽसत्त्वात्। यो जीवन्यत्र नास्ति स ततोऽन्यत्रास्ति यथाहिमित्यनुमानेनैव बहिर्भावस्य प्रतीयमानत्वात्किमर्थापत्तेः पृथक्कल्पनया। मृते व्यभिचारवारणाय सत्यन्तं, गृहे विद्यमाने देवदत्ते व्यभिचारवारणाय विशेष्यभाग इति ध्येयम्॥

ननूपमानमपि पृथक् प्रमाणमस्ति। अतिदेशवाक्यार्थस्मरणसहकृत गोसादृश्यविशिष्टपिण्डज्ञानमुपमानम्। तथा हि—

कश्चिद्गवयपदार्थमजानन् कुतश्चिदारण्यकात् पुरुषाद्गोसदृशो गवय इत्यतिदेशवाक्यं श्रुत्वा वनं गतस्तद्वाक्यार्थं स्मरन् गोसादृश्यविशिष्टपिण्डं पश्यति। तदनन्तरमयं गवयशब्दवाच्य इति प्रमितिरुत्पद्यते। तन्न, उपमानस्याप्यनुमान एवान्तर्भावात्। यथा विमतो गवयशब्दवाच्यः अगोत्वे सति गोसदृशत्वद्यतिरेकेण घटवत्। गोसदृशे गवान्तरे व्यभिचारवारणाय विशेष्यमिति॥

नन्वभावाख्यं पृथक्प्रमाणमस्ति। तच्चाभावग्रहणायाङ्गीकरणीयम्। यथा हि – घटाद्यनुपलब्धौ घटाभावो निश्चीयते, अनुपलब्धिश्चोपलब्ध्यभावः इति अभावप्रमाणेन घटाभावो गृह्यत इति चेन्न । तस्योक्तेष्वन्तर्भावात्॥ तथा हि । अभावज्ञानकारणमभाव प्रमाणम्। तत्रेदानीं कौरवाद्यभावो भारतादवगम्यते॥ देवदत्तस्य चक्षुराद्यबावः विमतश्चक्षूरहितः अरूपज्ञत्वादित्यनुमानगम्यः॥ सुखाद्यभावप्रमितिस्तु साक्षिप्रत्यक्षेणैव गम्या। पुरोवृत्तिघटाद्यभावप्रतीतिस्तु झटिति जायमाना प्रत्यक्षफलमेव, नत्वनुपलब्धिमात्रजन्या; अपरोक्षज्ञानत्वात्। अनुपलब्धिस्त्ववर्जनीयसन्निधिरेव। अनुपलब्धेरवर्जनीयसन्निधित्वमात्रेण पृथक् प्रमाणत्वे भावोपलब्धावभावानुपलब्धिरपि प्रमाणं स्यात्।

यत्र त्वन्धकारे हस्तप्रसरणादिरूपपरामर्शेन घटाभावं प्रत्येति तदाऽनुपलब्धिस्तत्त्वेन न तत्कारणम्, किन्तु लिङ्गत्वेनैव — घटोऽत्र नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वात् गजवदिति॥

नन्वभावस्यापीन्द्रियेण सन्निकर्षानुपपत्तेर्न तज्ज्ञानस्य प्रत्यक्षफलत्वमिति चेन्न। भाववदभावस्यापि इन्द्रियसन्निकर्षे बाधकाभावात्।

ननु सम्भवादीन्यपि पृथप्रमाणानि सन्ति। मैवम्। तेषामप्युक्तेष्वन्तर्भावात्। तथा हि – अल्पप्रमाणसाधनं बहुलज्ञानं सम्भवः। यथा शतमस्तीति ज्ञाने —शतवत्त्वात् यथाहमिति प्रयोगसम्भवात्।

प्रसक्तप्रतिषेधे परिशिष्यमाणे बुद्धिः परिशेषः। स द्विविधः— विधिमुखो निषेधमुखश्च। तत्राद्यो यथा — चैत्रमैत्रयोरयं चैत्र इत्युक्तेऽन्यस्मिन् मैत्रप्रमा। द्वितीयो यथा — नायं चैत्र इत्युक्ते तस्मिन् मैत्रप्रमेति॥ इयमप्यनुमानजन्या, विमतो मैत्रः चैत्रमैत्रयोरन्यतरत्वे सत्यचैत्रत्वात् व्यतिरेकेण चैत्रवदिति प्रयोगोपपत्तेः। घटादौ व्यभिचारवारणाय सत्यन्तम्।

उपक्रमादीन्यपि अनुमानान्येव। एतेषां वाक्यतात्पर्यानुमापकत्वात्।

अनिर्दिष्टवक्तृकं प्रवादपारम्पर्यमैतिह्यम्। यथाऽत्र वटे पिशाचोऽस्तीति वाक्यम्। तदागम एव।

एवमन्यानि शाकुनलिपिचेष्टादीन्यपि प्रमाणान्युक्तेष्वन्तर्भाव्यानि।

## प्रामाण्यस्वतस्त्वम्

अथ प्रामाण्यं निरूप्यते। प्रमाण्यस्य स्वतस्त्वं द्विविधम् — उत्पत्तौ ज्ञप्तौ चेति॥ तत्र उत्पत्तौ स्वतस्त्वं नाम ज्ञानकारणमात्रजन्यत्वम्। येन ज्ञानं जायते तेनैव तद्गतं प्रामाण्यं जायत इति॥ ज्ञप्तौ स्वतस्त्वं नाम ज्ञानग्राहकमात्रग्राह्यत्वम्। येन ज्ञानं गृह्यते तेनैव तद्गतप्रामाण्यमपि गृह्यते इति॥

## अप्रामाण्यं परतः

अप्रामाण्यस्य परतस्त्वमपि द्विविधम्—उत्पत्तौ ज्ञप्तौ चेति॥ तत्रोत्पत्तौ परतस्त्वं नाम ज्ञानकारणातिरिक्तकारणजन्यत्वम्। ज्ञप्तौ परतस्त्वं नाम ज्ञानग्राहकातिरिक्तग्राह्यत्वमिति वस्तुस्थितिः॥

## प्रामाण्यविषये सिद्धांतः

तत्र 'ज्ञानानां प्रामाण्यमप्रामाण्यं च उत्पत्तौ ज्ञप्तौ च स्वत एवे'ति साङ्ख्या मन्यन्ते॥'उभयं परत एवे'ति नैयायिकाः। तत्र ज्ञानमिन्द्रियादिजन्यम्, प्रामाण्यं पुनरिन्द्रियादिगुणजन्यम्, तथा अप्रामाण्यं तद्दोषजन्यम्। एवं ज्ञानं मानसप्रत्यक्षवेद्यम्, तत्प्रामाण्यज्ञानं च संवादविसंवादादिलिङ्गजन्यमिति। प्रमासाधारणकारणं गुणः, अप्रमासाधारणकारणं दोषः॥'प्रामाण्यं परतोऽप्रामाण्यं स्वत' इति बौद्धाः॥

वस्तुतस्तु -इन्द्रियादिनैव ज्ञानं प्रामाण्यं चोत्पद्यते अप्रामाण्यं तु दोषासहकृतेन्द्रियादिभिरुत्पद्यते। तथा ज्ञानं तत्प्रामाण्यं च साक्षिणैव ज्ञायते, अप्रमाणज्ञानस्वरूपमात्रं साक्षिवेद्यम्, तदप्रामाण्यं तु विसंवादादिनानुमेयम्॥ करणानां तु ज्ञानजनकशक्तिरेव स्वकारणसाधिता प्रामाण्यजनकत्वशक्तिः। अप्रामाण्यजनने तु दोषवशादन्या शक्तिराविर्भवति। ज्ञप्तिस्तु परत एव, इन्द्रियादिस्वरूपस्य यथातथं प्रमाणवेद्यत्वात्; यथार्थज्ञानसाधनत्वस्यानुमानवेद्यत्वादिति।

ननु 'ज्ञानग्राहकमात्रेणैव तत्प्रमाण्यग्रहणं' इत्येतत्कुतः, ज्ञानग्राहकातिरिक्तग्राह्यत्वे किं बाधकमिति चेन्न यथात्वेऽनवस्थानात्। तथा हि, प्रामाण्यं तावदवश्यं केनचित्प्रमाणेन ज्ञातव्यं, अयथा तदभावप्रसङ्गात्। न च ज्ञानग्राहकातिरिक्तेन तद्ग्रहणं स्वतस्त्वे प्रथमस्यैव ततताल्वाङ्गीकारोपपत्तेः। अतः परिशेषात्प्रामायस्य स्वतस्त्वसिद्धिः।

न च साक्षिवेद्यत्वेऽप्यनवस्थानप्रसङ्गः समान इति वाच्यम्, साक्षी स्वयमप्रकाशः स्वात्मानं स्वप्रामाण्यं च गोचरयतीत्यङ्गीकारात्॥ ज्ञानस्यैव तथाभावोऽभ्युपगम्यतामिति चेन्न अन्तः करणवृत्तेर्ज्ञानस्य जडत्वेन स्वयम्प्रकाशत्वायोगादिति॥ करणप्रामाण्यं तु पद्धत्युक्तरीत्या ज्ञातव्यमिति सर्वं रमणीयम्॥ श्रीः॥

**इति श्रीमज्जयतीर्थपूज्यपादप्रदर्शितमाम्नानुवर्तिन्यां श्रीमच्छलारिशेषाचार्यविरचितायां प्रमाणचन्द्रिकायां आगमपरिच्छेदः समाप्त॥**

## अथ प्रमेयपरिच्छेदः

एवं प्रमाणस्वरूपं सपरिकरं निरूप्य इदानीं परापरतत्त्वरूपं प्रमेयं निरूप्यते।

## तत्त्वम्

प्रमितिविषयस्तत्त्वम्। तत्त्वमिति लक्ष्यनिर्देशः। प्रमितिविषय इति लक्षणोक्तिः॥ तदुक्तं तत्त्वविवेकटीकायाम् — अत्र प्रमेयमित्यनुवादेनैव तत्त्वस्य सामान्यलक्षणं चोक्तमिति।

मितिविषयत्वं शुक्तिरजतादिसाधारणमतः प्रेत्युपसर्गः॥ नन्वेवमपिशुक्तिरजतं नास्तीति प्रमितिविषयत्वस्य तत्र सत्त्वेनातिव्याप्तितादवस्थ्यमिति चेन्न। अस्तीति प्रमितिविषयत्वस्य विवक्षितत्वात्। तस्य च तत्राभावात्॥

ननु तथापि पुनः शुक्तिरजतेऽतिव्याप्तिः, भ्रमस्यापि धर्म्यंशे प्रमात्वेन प्रमात्वाधारज्ञानविषयत्वरूपप्रमाविषयत्वस्य स्तत्वादिति चेन्न, यदंशे ज्ञानस्यास्ति प्रमात्वं, तद्विषयो यः, तत्तत्त्वमित्यङ्गीकारात्॥

ननु तथापि भ्रमविषयकानुव्यवसायस्य प्रमात्त्वेन परस्परया तद्विषये शुक्तिरजतादावतिव्याप्तिर्दुर्वारेति चेन्न, प्रतीत्यन्तराव्यवधानेन ज्ञानशून्ये पुरुषे असच्छब्दप्रयोगात् प्रमितिरपि सत्ता भवति। कार्योपयुक्तव्यापाररहिते पुरुषे असच्छब्दप्रयोगात् प्रवृत्तिरपि सत्तेत्यवगन्तव्यम्।

## स्वतन्त्रम्

अथवा स्वसत्तायां परानपेक्षं स्वतन्त्रमित्येव लक्षणम्। सत्ता उक्तरीत्या त्रिविधेति ज्ञातव्यम्। परानधीने तुच्छेऽतिव्याप्तिवारणाय स्वसत्तायामिति विशेषणम्॥ यद्वा स्वरूपसत्तायां परानपेक्षं स्वतन्त्रमित्यादि पृथक् लक्षणत्रयं विवक्षितमिति बोध्यम्॥

## अस्वतन्त्रम्

सत्तात्रैविध्ये परापेक्षमस्वतन्त्रम्। यद्यपि भावाभावतया चेतनाचेतनतया वा नित्यानित्यतया वाऽस्य द्वैविध्यं शक्यते वक्तुम्, तथापि वैयर्थ्यादयमेव विभागो न्याय्यः।

परतन्त्रप्रमेयं स्वतन्त्रप्रमेयायत्ततया विदितं हि निःश्रेयससाधनं भवति। तदुक्तम्

य येतत्परतन्त्रं तु सर्वमेव हरेः सदा।
वशमित्येव जानाति संसारान्मुच्यते हि सः' इति।

अन्यथा गङ्गावालुकापरिगणनवदिदं तत्त्वपरिगणनमपार्थकं स्यात्।

अस्वतन्त्रतत्त्वं द्विविधम्—भावोऽभावश्चेति। अबावप्रतीतिः भावप्रतीत्यधीना नियमेनेति पार्धान्यात् प्रथमं भावस्योद्देशः।

## भावः

ननु किमिदं भावत्वम्? निष्प्रतियोगिकत्वं तदिति चेन्न, सादृश्यादावव्याप्तेः। तस्याप्ययमनेन सदृश इति प्रतियोगिनिरूप्यत्वात्॥ अभावान्यत्वं तदिति चेन्न, घटाभावस्यापि यत्किञ्चिदभावान्यत्वेन तत्रातिव्याप्तेः॥ अभावत्वानधिकरणत्वं तदिति चेन्न अभावत्व एवातिव्याप्तेः॥ अभावत्वानधिकरणत्वं तदिति चेन्न अभावत्व एवातिव्याप्तेः। अभावत्वस्याभावत्वानधिकरणत्वात्। अभावविरोधित्वं तदिति चेन्न, नित्यत्वाभावेऽतिव्याप्तेः। तस्याप्यनित्यत्वाभावविरोधित्वात्॥

विधिमुखवेद्यत्वमिति चेन्न, अभावस्यापि घटाभावोऽस्तीति विधिमुखवेद्यत्वेनाभावेऽतिव्याप्तेः। नास्तीति प्रतीत्यविषयत्वमिति चेन्न घटस्यापि घटाभावो नास्तीति प्रतीतिविषयत्वेनासम्भवात्। तस्माद्भावत्वं दुर्निरूपमिति चेन्न । अस्तीति प्रतीतिविषयत्वस्य भावलक्षणत्वेन विवक्षितत्वात्॥ न च 'द्वितीयादिप्रतीतौ भावस्याप्ययं शुक्लो नेति प्रतीतिविषयत्वेनास्तीति प्रतीतिविषयत्वाभावा-द्व्याप्तिरभावेऽतिव्याप्तिश्च। तस्य द्वितीयादिप्रतीतौ अस्तीति प्रतीतिविषयत्वात् इति वाच्यम्। लक्षणे प्रथमप्रतीताविति विशेषणात्।

ननु शुक्तिरूप्यादौ अत्यन्तासति भावलक्षणमतिव्याप्तमिति चेन्न। प्रतीतपदस्य प्रमापरत्वेनोक्तचोद्यनवकाशात्। तथा च प्रथमप्रतीतौ योऽस्तीतिप्रमाविषयः स भाव इति भावलक्षणमुक्तं भवति।

## अभावः

ननु किमिदमभावत्वम्? भावभिन्नत्वमिति चेन्न, भावस्याभावभिन्नत्वेनान्योन्याश्रयात्॥ न च भाववत्वमन्यदेवेतिनान्योन्याश्रय इति वाच्यम् । तथात्वे घटेऽतिव्याप्तेः। तस्य यकत्किञ्चिद्भावभिन्नत्वात्। भावत्वानधिकरणत्वमिति चेन्न, भावत्वेऽतव्याप्तेः। तस्य भाववत्वानधिकरणत्वात्। भावत्वानधिकरणत्वस्याभावरूपत्वेनात्माश्रयाच्च॥ प्रतियोगिज्ञानाधीनज्ञानत्वं तदिति चेन्न, शीतस्पर्शस्याप्युष्णस्पर्शविरोधित्वेन तत्रातिव्याप्तेः॥ निषेधमुखवेद्यत्वमभावत्वमिति चेन्न, घटस्यापि घटाभावो नास्तीति निषेधमुखवेद्यत्वात्॥ विधिप्रत्ययाविषयत्वमिति चेन्न, उभावस्याप्यभावोऽस्तीति प्रत्ययविषयत्वेनासम्भवात्॥

तस्मादभावत्वं दुर्निरूपमिति चेन्न, नास्तीति प्रतीतिविषयत्वस्याभाव-लक्षणत्वेन विवक्षितत्वात्॥ न च 'द्वितीयादिप्रतीतौ भावस्याप्ययं शुक्लो नेति प्रतीतिविषयत्वेन तत्रातिव्याप्तिः। अभावेऽव्याप्तिश्च तस्य द्वितीयादिप्रतीतावस्तीति प्रतीतिविषयत्वात्' इति वाच्यम्, अस्मिन् लक्षणेऽपि प्रथमप्रतीताविति विशेषणस्य विवक्षितत्वात्॥ न चारोपिताभावेऽतिव्याप्तिः प्रतीतिपदस्य प्रमापरत्वात्॥ ननु प्रागभावे भविष्यतीति प्रतीतिविषयत्वस्य, प्रध्वंसाभावे विनष्ट इति प्रतीतिविषयत्वस्य सद्भावेन; नास्तीति प्रतीतिविषयत्वाभावात्तत्रातिव्याप्तिरिति चेत्, मैवम्, कार्योत्पत्तेः पूर्वं कार्यध्वसानन्तरं नास्तीतिप्रतीतिविषयत्वस्य सर्वजनानुभवसिद्धत्वात्॥

ननु तथाप्यन्योन्याभावे नास्तीति प्रतीतिविषयत्वाभावादव्याप्तिरिति चेन्न, नास्तीतिप्रतीयत इत्यस्य नेति प्रतीयत इत्यर्थस्य विवक्षितत्वात्। धर्म्यतिरिक्ताभावलक्षणपरत्वान्नोक्तशङ्कावकाश इत्यप्याहुः, ततश्च प्रथमप्रतीतौ यो नास्तीति पिरमाविषयः सोऽभवा इत्यभाव लक्षणमुक्तं भवति॥

कुत एतत्? स्वरूपेण हि भावाभावौ विधिनेषेधात्मानौ, रूपान्तरेण तु निषेधविधिरूपौ। तत्रापातजायां संविदि स्वरूपमेवावभासते, द्वितीयादिप्रतीतौ रूपान्तरम्। तथा च प्रतीतिः — अस्त्यत्र घटः, स न शुक्ल इति। एवं नास्त्यत्र घटः, अस्ति घटाभाव इति।

ननु स्वतन्त्रतत्त्वं भावोऽभावोऽन्यद्वा? नाद्यद्वितीयौ, भावाभावयोः परतन्त्रप्रभेदत्वात्, न तृतीयः, व्याघातात्। मैवम् । स्वतन्त्रतत्त्वस्य भावलक्षणाक्रान्तत्वेन भावत्वात्॥ परतन्त्रं भावाभावतया द्विविधमेव, न पुनरेकविधं, नापि त्रिविधमित्येवम्परो विभागः न पुनः परतन्त्रमेव भावाभावात्मकमिति॥ अत्र विशेषस्तु तत्त्वसङ्ख्यानोक्तरीत्या द्रष्टव्यः॥

## चेतनः

भावो द्विविधः — चेतनोऽचेतनश्चेति। सर्वमचेतनं चेतनार्थमिति चेतनस्य प्राधान्यात्पूर्वोद्देशः॥ चेतयते जानातीति ज्ञातृत्वं चेतनस्य लक्षणम्। एवं विधो न भक्तीत्यज्ञातृत्वमचेनस्य लक्षणम्॥

चेतनो द्विविधः दुःखस्पृष्टः, तदस्पृष्टश्चेति॥ यद्यप्य नयोर्दुखास्पृष्टचेतनः प्राधान्यात्पूर्वमुद्देश्यः, तथाप्यभावस्य भाव निरूप्यत्वाद्दुःखस्पृटस्य प्रथममुद्देशः॥ कदाचिदपि दुःखासम्बद्धस्तदस्पृष्टः मुक्तेष्वतिव्याप्तिपरिहाराय कदाचिद्पीति॥ तत्र रमा दुःखास्पृष्टा। तदन्ये चेनताः दुःखस्पृष्ठाः॥

दुःऋस्पृष्टाः द्विविधाः —मुक्ता वत्रमानदुःखाश्चेति॥ मुक्तानां पूर्वं दुःखसम्बन्धाद्दुःकस्पृष्टतवं ज्ञेयम्। मुक्ता ब्रह्माद्याः मनुष्योत्तमान्ता अनेकविधाः।

वर्तमानदुःखा द्विविधाः — मुक्तियोग्याः मुक्त्ययोग्याः। तत्र मुक्ता इव मुक्तियोग्या अपि अनेकविधाः।

मुक्त्ययोग्या द्विविधा। तमोयोग्या नित्यसंसारिणश्चेति।

तमोयोग्याश्चतुर्विधाः— दैत्यराक्षसपिशाचमानुषाधमभेदात्॥ एवं प्राप्ततमसोऽपि चतुर्विधाः॥

## अचेतनम्

अचेतनं त्रिविधम् – नित्यं नित्यानित्यमनित्यं चेति। नित्यं वेदादिकम्, नित्यानित्यं प्रकृतिकालपुराणादि, अनित्यं महदादि। अत्र विसेषस्तु तत्वसङ्ख्यानडीकोक्तरीत्या द्रष्टव्यः।

## अभावविवरणम्

एवं भावं सप्रपञ्चं निरूप्य, अभावो निरूप्यते॥ अभावस्त्रिविधः — प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति॥ प्रामाणिकप्रतियोगिकत्वात्प्रागभावप्रध्वंसाभावयोरप्रामाणिक-प्रतियोगिकात्यन्ताभावापेक्षया प्रथममुद्देशः। तत्रापि प्रागभावस्य पूर्वभावित्वात्प्रध्वंसापेक्षया प्रथममुद्देशः। तत्रापि प्रागभावस्य पूर्वभावित्वात्प्रध्वंसापेक्षया प्रथममुद्देशःथ इत्यवधातव्यम्।

योऽभावः प्रतियोगिकालापेक्षया प्रागेवास्ति स प्रागभावः। अत्राभावः इत्यनुक्तौ घटसामग्र्यादावतिव्याप्तिः।

योऽभावः प्रतियोगिकालापेक्षया परत एवास्ति स प्रद्वंसः॥ अत्राभाव इत्यनुक्तौ प्रतियोगिकालापेक्षया अनन्तरं विद्यमानोत्तरकालेऽतिव्याप्तिः। प्रतियोगिकालापेक्षयेत्यनुक्तौ घटध्वंसस्य तन्त्वाद्युत्पत्तिकालात्प्रागपि सत्त्वेनासम्भवः। परत इत्यनुक्तौ घटप्रागभावेऽतिव्याप्तिः।

योऽभावः धर्मिभिन्नत्वे सति कालत्रयेऽस्ति सोऽत्यन्ताभाव॥ अत्राभाव इत्यनुक्तौ नित्यभावेष्वतिव्याप्तिः। कालत्रय इत्यनुक्तौ प्रागभावादावतिव्याप्तिः। धर्मिभिन्नत्वे सतीत्यनुक्तौ आकाशादि निष्ठान्योन्याभावेऽतिव्याप्तिः।

ननु नाभावस्य त्रैविध्यं सम्भवति' । इह भूतले घटो नास्ती'ति सार्वजनीनप्रतीतिविषयस्य संसर्गाभावस्यान्यस्य सत्त्वादिति चेन्न, तस्य यथासम्भं प्रागभावादिष्वन्तर्भावात्। घटानयनात्प्राक् संसर्गप्रागभावः, तदपनयनानन्तरं संसर्गप्रध्वंसः, यत्र तु कालत्रयेऽपि घटसंसर्गो नास्ति तत्र संसर्गात्यन्ताभाव इति ज्ञातव्यम्।

नन्वश्वे गोत्वं नास्तीत्यादौ प्रतीयमानो गोत्वाभावश्चतुर्थः स्यात्, निरवधिकत्वेन तस्य प्रागभावादिध्वंसानन्तर्भावात्, प्रामणिकप्रतियोगिकत्वेनात्यन्ताभावानन्तर्भावाच्चेति चेत्; अत्र ब्रूमः उक्तरीत्या अश्वे गोत्वसंसर्गस्यैव निषेध्यत्वेन तदभावस्यात्मनाभावान्तर्भावसम्भवात्।

## अन्योन्याभावस्य वस्तुस्वरूपत्वम्

ननु तथापि नाभावस्त्रिविधः अन्योन्याभावस्य चतुर्थस्य विद्यमानत्वादिति चेन्न, अन्योन्याभावस्य धर्मिस्वरूपत्वात्। अतो नाभावत्रित्वभङ्गः।

नन्वेतावता प्रबन्धेन द्रव्याणामभावानां न स्वरूपं विचारितं नैतावता सर्वं तत्त्वं विचारितं भवति, गुणकर्मसामान्यादीनामविचारितत्वात्। न चैते न सन्त्येव प्रत्यक्षादिसिद्धत्वादिति। सत्यम्। सन्त्येव गुणादयः। किं नाम यथा भावा अत्यन्ताभिन्नाः, न तथा गुणादयः। अपि तु स्वाश्रयद्रव्यस्वरूपभूता एव। अतो न ते पृथक्कथ्यन्ते।

## गुणगुणिनोः भेदाभेद-अत्यंताभेदविचारः

द्रव्यस्वरूपभूता गुणादयो द्विविधा — यावद्द्रव्यभाविनोऽयावद्द्रव्यभाविनश्चेति। तत्र यावद्द्रव्यभाविनो ये गुणादयस्तत्र भेदो नास्ति, किन्त्वत्यन्ताभेद एव। अयावद्द्रव्यभाविनो ये गुणादयस्तत्र भेदाभेदौ प्रतिपत्तव्यौ।

एवमुपादानोपादेययोर्भेदाभेदावेव प्रतिपत्तव्यौ। यथा पटोत्पत्तेः पूर्वं तन्नाशानन्तरमपि सत्स्वपि तन्तुषु पटस्याभावाद्भेदो ज्ञातव्यः, पटस्य तन्तुभिर्भेदानुपलम्भादभेदो ज्ञातव्यः।

तथा गुणगुणिनोरपि भेदाभेदावत्यन्ताभेदश्चेति द्रष्टव्यम्। यथा सत्यपि चूतफले आतपेन श्यामरूपस्य प्राक्फलेन भेदानुपलम्भादभेदो ज्ञातव्यः। पटगतशौक्ल्यादीनां गुणानां यावद्द्रव्यभावित्वेन गुणिना पटेनात्यन्ताभेदो ज्ञातव्यः।

## क्रियाक्रियावतोः भेदाभेदात्यन्तभेदविचारः

क्रियाक्रियावतोरपि गुणगुणिवद्भेदाभेदावत्यन्ताभेदश्चेति ज्ञातव्यम्। यथा तत्र पटचलनयोर्भेदाभेदौ। सत्यपि पटे चलनस्याभावद्भेदः अयावद्द्रव्यभावित्वात्, पटचलनदशायां पटचलनस्य पटेन सह भेदादर्शनादभेदो ज्ञातव्यः।

चेतनतत्क्रिययोरत्यन्ताभेदः क्रियाया अपि नित्यत्वात्। चेतनक्रियायाः नित्यत्वोपपादनं न्यायसुधायां टीकाकारैः कृतमनुसन्धेयम्।

## जातिव्यक्तिविचारः

तथा जातिव्यक्त्योर्भेदाभेदावत्यन्ताभेदश्चेति ज्ञातव्यम्। यथा तत्र ब्राह्मणत्वब्राह्मणयोर्भेदाभेदौ। सत्यामपि ब्राह्मणव्यक्तौ महापातकेन ब्राह्मणत्वजातेरपायाद्भेदः अयावद्द्रव्यभावित्वात्, 'मासेन शूद्रो भवति ब्राह्मणो रसविक्रयात्' इति रसविक्रयपातकेन ब्राह्मणत्वजातेरपायश्रवणात्; तथा अयस्ताम्रादिपदार्थानं स्पर्शमणिसम्बन्धेन सुवर्णत्वप्राप्त्या अयस्त्वादिजात्यपायदर्शनात्। ब्राह्मणत्वस्य ब्राह्मणव्यक्त्या प्राक् भेदानुपलम्भादभेदो ज्ञातव्यः। पटपटत्वयोरत्यन्ताभेद एव यावद्द्रव्यभावित्वात्।

विशिष्टस्य विशेष्यस्वरूपस्य भेदाभेदावत्यन्ताभेदश्चेति ज्ञातव्यम्। यथा — तत्र देवदत्तस्य दण्डिनश्च भेदाभेदौ सत्यपि देवदत्ते दण्डिनोऽभावाद्भेदः अयावद्द्रव्यभावित्वात्।

## अंशांश्यभेदभेदाभेदविचारः

तथा अंशांशिनोरत्यन्ताभेदो भेदाभेदौ द्रष्टव्यौ। यथा तत्र तन्तुलक्षणैकैकांशेन पटस्य भेदाभेदौ एकैकतन्तुरूपांशापगमेऽपि अंशिनः पटस्यावस्थानाद्भेदः अयावद्द्रव्यभावित्वात्, व्यतिषङ्गविशेष-विशिष्टत्वावस्थायामंशस्यांशिनोऽभेदो ज्ञातव्यः। व्यतिषङ्गविशेषविशिष्टैः सर्वैस्तन्तुरूपांशैरत्यन्ताभेद एव, तद्व्यतिरेकेण पटस्यैवाभावात्। तथोक्तं 'तन्तुभ्योऽन्यः पटः साक्षात्कस्य दृष्टिपथं गतः' इति।

अतो गुणादयो वस्तुस्वरूपत्वान्न पृथक्कल्पिता इति स्थितम्। तदुक्तं — 'कार्यकारणयोश्चैव तथैव गुणतद्वतोः। क्रियाक्रियावतोश्चैव तथा जातिविशेषयोः । विशिष्टशुद्धयोश्चैव तथैवांशांशिनोरपि' इति।

## सर्वं स्वतन्त्राधीनम्

ननु भावाभावादिभेदभिन्नमस्वतन्त्रतत्त्वं स्वतन्त्रतत्त्वाधीनतया ज्ञातं हि निःश्रेयसाधनमित्युक्तं, तत्र कस्मिन् विषये अस्वतन्त्रतत्त्वस्य भगवदधीनत्वं ज्ञातव्यमिति चेत्; सृष्टिस्थितिसंहारादिधर्मेषु भगवदधीनत्वं ज्ञातव्यमित्यवेहि। किमत्र प्रमाणमिति चेन्न । 'सृष्टिःस्थितिः संहृतिश्च नियमोऽज्ञानबोधने। बन्धो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च। विष्णुनाऽस्य समस्तस्य समास व्यासयोगतः' इति स्मृतेरेव प्रमाणत्वात्।

अस्यार्थः — नियमो व्यापारेषु प्ररणम्॥ बन्दः प्रकृतेः सकाशात्। मोक्षः प्रकृतिबन्धात्। आवृतिः बाह्यतमः। ज्योतिः बाह्यप्रकाशः। एकारो विष्णुनेत्यनेन सम्बध्यते। अस्य समस्तस्यास्वतन्त्रतत्त्वस्य। भवन्तीति शेषः।

नन्वेतत्सृष्टिस्थितिवाक्यं पूर्वोक्तविरुद्धम्। समस्तस्य सृष्टिसंहारोक्तौ वेदादीनां नित्यत्वोक्तिविरोध, अचेतनस्य बोधोक्तौ प्रत्यक्षादिविरोधः, इत्यत उक्तं- समासेति। समासः सङ्क्षेपः, व्यासो विस्तारः, तावेव योगावुपायौ, उक्तार्थघटनायाम्।

तदिदमुक्तं भवति — उक्तधर्मेषु यत्र तत्त्वे अल्पीयांसो धर्माः सम्भवन्ति तत्र तावन्तो विष्ण्वधीनाः ज्ञातव्याः, यत्र तु बहवः तत्र ताव्तो धर्मो विष्णुवधीनाः ज्ञातव्यः। तत्र स्थितिनियमौ सर्वस्य। सृष्टिसंहृती नित्यानित्यस्यानित्यस्य च। अत्राज्ञानपदं भावाभावोभयविधाज्ञानपरम्। तत्र भावरूपाज्ञानं दुःखस्पृष्टस्य, ज्ञानभावस्तु सर्वस्य। बोधनं चेतनस्य। सुखं प्राप्ततमसो विना सर्वस्यास्वतन्त्रचेतनस्य। दुःखं दुःखास्पृष्टं विना सर्वस्य चेत्यादि द्रष्टव्यम्।

## अंतिममंगलम्

तदेवं प्रमाणैर्मुमुक्षुणा स्वतन्त्रो भगवान् सकलजगज्जन्मादिकर्ता सकलगुणपरिपूर्णः, सकलदोषदूर इत्यादिरूपेण तं ज्ञात्वा, तद्भजने कृते तस्याशेषानिष्टनिवृत्तिविशिष्टपरमानन्दावाप्तिरूपमोक्षो भवतीति अशेषमतिमङ्गलम्॥

मदाचार्यमनोधाममध्वमानसमञ्चके।

शयानः श्रीधराश्लिष्टस्तुष्यान्मत्कृतितो हरिः॥

**इति श्रीमद्विद्वच्चूडामणिछलारिनृसिंहाचार्यशिष्य शेषाचार्यविरचितायां प्रमाणचन्द्रिकायां प्रमेयपरिच्छेदः समाप्ता॥**

**श्रीकृष्णार्पणमस्तु – समाप्तोऽयं ग्रन्थः॥**